
I have received my education in a Brahmin family, and I am married in a Nāgara family" (24/1–2), Incidentally this reply contains valuable information that the Nāgara Brahmins, an important community of Banaras, had migrated there from Gujarat as early as the 12th century.

The keen observation of Paṇḍita Dāmodara did not leave unnoticed even the simple dress of the students at Banaras. In the 12th century as to day the Brahmin students wore huge knots on their shaven heads, and their dress was a simple *dhotī* or waist-cloth (31/28-29).

It has been said above that the teachers looked after the moral and material welfare of their students, but there were occasions when they did not spare their rod to put their student on the right path (31/12). Even to this day Banaras Paṇḍits regard corporal punishment as an infallible means to compel students to take their lessons more seriously. But this kind of punishment did not estrange the cordial relations between the teachers and their students, and the latter regarded the service to their teachers as a means of shedding their sins (23/7–8).

Religious condition of Banaras in Gāhaḍwāla Period.

The *Ukti-Vyakti Prakaraṇa* has preserved in the popular proverbs of the eastern United Provinces the popular attitude towards religion. The people regarded religion as the source of all happiness. Religion removed sins (5/24) and it was the source of all laws (5/25). In many proverbs (33/7; 33/12; 33/14; 33/19; 33/21; 33/23; 33/25) it has been emphasised that with greater emphasis on the moral side of religion sins took to their heels.

From the proverbs quoted by the *Ukti-Vyakti* it is also apparent that the people of Banaras were well aware of the fundamental concepts of Hindu religion. Compassion for all beings (9/30), desisting from stealing (9/31), getting rid of anger (9/31), realising the transience of the world (10/3), helping others (10/4), etc., were the virtues insisted upon in this period. These precious gems of religious thought of the Middle country, laying emphasis on the simple ethical concept of religion, show that there was nothing radically wrong with the heart of the people.

The Brahmins, in the medieval conception of Hindu religion, held most predominant position in the society. It is said at one place that Govindachandra established the Brahmana community

of Banaras on a very sound footing (21/17–18). In religious festivals, after the people had taken their bath and worshipped at the temples, they offered alms to the Brahmanas and thereafter partook of their meals (11/11–12). Cows were given to the Brāhmaṇas as gifts (14/18–19); and giving big feasts to them was regarded as a meritorious act. In such feasts, given by the religious-minded people, the invitees did full justice to the food (36/3). The Brāhmaṇas were not satisfied with coarse food; they immensely enjoyed sweet *laḍḍūs* (14/19). As soon as a Brahmin entered the dwelling of a house-holder due respect was shown to him and he was offered a stool to sit (50/25). After enjoying good food and receiving some cash money the Brahmins were fully satisfied and offered their benediction to their hosts (9/36-37).

The people of Banaras in the 12th century as to day regarded the Gaṅgā with great affection and respect. It was universally accepted that taking bath in the Gaṅgā removed sins (5/23-24).

People in Gāhaḍwāla period showed full respect to their forefathers. It was the confirmed belief of the people that it was by the religious deeds of their decendants that their forefathers attained salvation; and the forefathers in the heaven blessed their progeny in return (21/20–22). But the departed forefathers were not to be appeased with mental respect only, they required concrete examples of their respect in the periodical *śrāddhas* as ordained by Hindu religion. Feasts given to the Brahmins were to the immense liking of the departed forefathers; as soon as a son of the family washed the feet of the Brahmins his forefathers went to the heaven (38/11). Offering water oblation also pleased the forefathers (42/8, 51/20). It was, however, ordained by the Hindu Śāstra that the performance of *śrāddha* at Gaya liberated the souls of the forefathers. In this age as well the Hindu offered *piṇḍa* at Gaya (23/12 13), and there were officeating priests who shepherded pilgrims to that city (51/28).

Expiation as a means to get rid of sins, and belief in untouchability were distinguishing features of the Hinduism of the 12th century. The drinking of the *Pañchagavya* (a mixture of milk, curds, ghee, cow's urine and cow-dung) was supposed to remove all sins (29/30).

Men on the street also believed in ghosts and the effectiveness of the charms. At one place the ghosts are mentioned infesting the burning ground (34/31). The charms and incantations were supposed to be imbued with hypnotic power (45/30), and they were also supposed to possess the power to restore the dead to life (46/26).

The *Ukti-Vyakti* has little to say on Jainism and Tantric Buddhism, as its author had very little to do with these religions. But at one place some information about the construction of the *stūpa* is given (48/25). The naked Jain Digambara *sādhus* are also mentioned at one place (40/10).

Social Condition

The Gāhaḍwāla inscriptions unfortunately throw very little light on the life and manners of the people in the 12th century. The *Ukti-Vyakti* fortunately, contains many proverbs and idioms which give intimate glimpses of the life and manners of the people of this period. The information thus gleaned shows that there was little difference between the life and manners of the people of Banaras in the 12th century and to-day. In the 12th century the majority of our people lived in thatched huts, huts, whose mid walls were always in the danger of subsiding in the rains (36/11). In old houses, generally, the plaster peeled off (37/13). The poor inhabitant of a village had to be on his alert to keep his house in good condition. He thatched it (39/6, 42/9), decorated the entrance to his house (40/22), and painted pictures on its walls (41/13).

Naturally most of the house-hold work was done by women such as winnowing (34/20), making beds (49/29), etc. But their chief work was cooking the food. Rich householders employed cooks, but generally cooking was the duty of the women of the house. Extreme sensitiveness to the caste pollution made rhe Pandit and students to cook their own food. The cook required fuel and cooking pots for cooking the rice (13/21). At one place (24/3-4) a cook is shown lighting the fire, heating the water in as utensil and thus cooking the rice at mid-day. From a questionnaire some information is obtained (21/26-31; 22/1) about a 12th century kitchen. The cook and women prepared cakes (*pūpa*), and all sorts of sweetmeats (*vyañjana*). The kitchen servant made arrangements for the fuel and water. Some people partook of favourite dishes such as the *sattū* mixed with *ghī* and sugar, rice pudding and the favourite *khichari*.

There are so many references to the art of cooking in the *Ukti-Vyakti* which show that the people of Banaras were adept in the art of cooking. Of course, giving feast to the Brāhmaṇas was an usual feature of Hindu life (21/4-7).

Rice was the staple diet of the people of Banaras and elsewhere as to-day. People also liked *pūris*, which were apparently well fried (16/6, 43/19). *Sattū* (parched grain powder) was also an usual

and convenient food. As we have said above it was eaten with the *ghī* and sugar. It was well kneaded and rolled into balls before eating (40/3; 45/15). People also liked the rice-pudding and the gruel. Parched grains were another form of convenient food (47/25). But people enjoyed nothing so much as sweetmeats (42/27).

It is also apparent from the *Ukti-Vyakti* that the people of Banaras were not simple vegetarians; they also liked non-vegetarian dishes. They knew how meat was cooked by closing the lid of the pot after lighting the fire (38/5). While cooking meat some sour spices were added to give it flavour (29/1). It was believed that the morsels of cooked rice flavoured with salt, meat and *ghī* increased one's appetite (46/15). Meat roasted on spits (*sīkhkabāb*) was also liked (49/28).

From the above description of the food of the people of the Eastern U. P., it should not be understood that it was very simple. As the *Ukti-Vyakti* points out people were fond of sweets, though unfortunately their names are not given. People liked variations in their daily food (37/30) to avoid monotony.

The idioms and proverbs in the *Ukti-Vyakti* also throw some light on agriculture and animal husbandry, the two main occupations of the people. Tilling the field (46/15), and taking care of the crops (45/30) were the main duties of the farmers as to-day. The fields were manured after tilling (39/16). Workmen were employed to harvest the paddy crops (13/22). The bullocks were branded (47/22), and two bullocks were usually yoked to the plough (40/6). To ensure safe water supply the wells were cleaned (46/14), and tanks were dug (49/22). After all this hard work, and provided the nature was kindly, their fields yielded bountiful crops (35/29).

People were fond of rearing cows, but as to day, even in the 12th century it was a specialised profession of the cowherds (5/14; 13/27). They tied ropes round them (30/20) and milked them (50/11). Stray cows usually tried to graze in the fields (45/22); then the enraged farmer forgetting all his respect for cows drove them away with sticks (16/22).

Men in comfortable circumstances in this age usually employed servants, but the treatment meted to them was rather harsh. As soon as the master came to the house the servant had to touch his feet and when ordered bring his dinner. In consideration of his services he received his food (22/3-7). But inspite of strenuous duties he was often pushed out by the neck (46/7), and to punish servants (48/7) was considered as a bounden duty of the master.

The maid-servants performed all kinds of menial services. They carried water (49/31), cleaned utensils (50/15) and swept the house floor (39/11), but whenever the master or the mistress of the household was angry, they, holding them by their pigtails threw them out (24/23).

People welcomed the birth of sons, and the life of a woman without any male issue was regarded as useless (10/7). A contemporary proverb says that the attainment of wealth and the birth of son pleased (35/1). People celebrated the birth of a son with dancing and feasts (36/25). But there were persons who envied the happy mother fondling her son (38/17). But inspite of their keen desire to have male issues people prayed that a virtuless son should not be born to them as he was sure to spoil the fair name of the family (43/11, 39/16). Perhaps people did not welcome the birth of a daughter (15/28–29), but if, owing to their misfortune, she was born she was brought up with love. When she attained the marriageable age then the family priest was asked as to whom she was to be given in marriage, and the usual answer of the Pandit was that she should be married to a man who was not of the same *gotra*, and removed five degrees from the mother's side and seven degrees from the father's side and that he should be able, virtuous and rich (22/27–30).

The *Ukti-Vyakti* also throws some interesting light on the amusements of the Eastern U. P. It seems that story-telling was a favourite form of amusement (41/5). At one place it is mentioned how the story telling began —"Innumerable kings reigned over the earth, and it is said there were many learned man in their courts. Among them many, such as Kālidāsa, Māgha, Kirāta, became very famous."

The people of Banaras in the 12th century were as fond of wrestling and gymnastics as today. It seems various tricks were employed in wrestling (34/19; 39/2). Playing with the balls was also a favourite sport (44/20). Children played with the terracotta figurines, specially the toy ducks (37/24).

There was no dearth of mimics and actors and it seems that no amount of pursuasion made them to give up their profession, on the contrary it made them more audacious (48/4).

People were fond of keeping parrots as pets and some of them could beautifully imitate the human speech (50/29). People were also fond of gambling (45/24). There was no dearth of dancers and musicians at Banaras. They were, however, not regarded as a respectable class as they used to train their daughters as professional dancers

(56/6). Apparently the reference is to the *Gandharvas* of Banaras, who give their daughters training in dancing and music, but their daughters-in-law are always treated as respectable women.

It is also remarkable that the puppet show was a popular form of amusement (52/17). Unfortunately it has now practically disappeared from the Eastern U. P.

Not much information is available about the general appearance of the city of Banaras, but apparently it was a city of lanes, and its hygenic condition was in no way praiseworthy. The dirty drains of the city were as filthy as to day (49/5).

The proverbs and in the *Ukti-Vyakti Prakaraṇa* show that the city and the district of Banaras were infested by robbers, thieves and other bad characters. Strong men unashamedly robbed their weak neighbours. There were also pickpockets. If caught, the thieves were given a sound beating by the watchmen (38/28–30). It seems that watchmen were employed to safe-guard the city wards (21/2, 4). Generally the thieves moved during the night (35/13). Citizens were, therefore, advised to keep awake (36/21). The bad characters of the city were ever ready to loot the country side (40/18). They also committed murders, sometimes burying the corpses of their victims to avoid detection (45/1). These scoundrels took special pleasure in victimising the simple village folks (41/8). These anti-social elements were so powerful and well organised that their victims were unable to find any remedy against them (24/39). Then there were gentlemen thieves who received stolen goods (34/30). No doubt these thieves and bad characters had given Banaras a notoriety in the 12th century with which even Hemachadrāchārya was acquainted.

It seems that even an ordinary citizen of Banaras dabbled in medicine. A common skin disease was *naharua* (34/27); people also suffered from the cold and cough (36/1). People knew of some household medicine. They knew that the myrobalan moved the bowels (47/20). There were also surgeons who carried on operations (40/6).

It is apparent from the *Ukti-Vyakti Prakaraṇa* that the merchants had a very important social status. There was no dearth of money with them (54/20), and they earned immense wealth through trade and commerce.

Small dealers were known as *Krayāṇaka* and their line of business was grain, spices, etc. (39/8; 45/8).

Then there were bankers who were very strict in their transactions. It is mentioned that it was difficult to get rid of them without making the full payment (23/16–18).

Coins in the Gāhaḍwāla period were usually known as *gadyāṇaka* or *gadiāṇa* (25/29). Cowries were in currency in place of the coins of small denominations (47/7).

The goldsmiths of Banaras were expert in their profession. They could make beautiful bangles (38/24), and inlay rubies (43/27). They also made talismanic ornaments (44/12).

Precious articles were kept under the charge of an officer known as *bhaṇḍārī*. He always saw that the boxes under his charge were properly locked (39/17), but inspite of all the precautions he took, the robbers often looted his store-house (44/11).

The *Ukti-Vyakti* also mentions some other professions. The oilmen pressed the ropeseed and also manufactured fragrant oil from the scented sesamum (40/31). The florist wreathed flowers (47/48) and the barber shampooed the body (39/11). The hunter hunted animals (43/35) and were great believers in good and bad omens (41/10; 41/9). The boatmen plied their boats (39/7), and they knew the depth of the Ganges at Banaras which enabled them to avoid the shallow water (46/11).

In the 12th century of the Indian history the principle of 'might is right' was firmly established. Forcible division of villages was a common occurrence (40/21). Usually, however, the fields were divided according to the law (44/10). In partition suits adjudicator divided the assets among the various claimants (41/16).

Banaras is famous for its cloth manufacture from very ancient time. Stray references in the *Ukti-Vyakti* support this. Cloth-dealers were known as *kapaḍiās* (5/15). There were also silk-weavers (39/8). Words for carding, ginning (39/8; 45/9) and warping (40/16) have been used in various idioms. *Sārīs* of very ordinary quality were woven from the flax yarn (43/22). Cloths fresh from the looms were also starched and calendered (43/22).

People in comfortable circumstances were fond of elephants and horses. Horses of good breed were led by grooms (48/12) and at ceremonial occasions they were beautifully decorated (43/9).

The *Ukti-Vyakti* does not give much information about the costume and ornaments of the people of Banaras. The women wore bangles and earrings and decorated themselves with painted designs (41/19).

पण्डितप्रवर-दामोदर-विरचितं

उक्तिव्यक्तिप्रकरणम् ।

[मूलभूताः कारिकाः ।]

पण्डितप्रवर-दामोदर-विरचितं

उक्तिव्यक्तिप्रकरणम् ।

[॥ मूलभूताः कारिकाः ॥]

॥ ॐ नमो वाग्देव्यै ॥

[१. क्रियोक्तिव्यक्तिनामकप्रकरणम् ।]

नानाप्रपञ्चरचना बहि[ऽ]कृतं[1] सारभूतमेकं यत् ।
नत्वा तत्त्वं वाचामुक्तिव्यक्तिं विधास्यामः ॥ १ ॥
स्यादि-त्यादी वृत्वा श्रुत्वा लिङ्गानुशासनं किञ्चित् ।
उक्तिव्यक्तिं बुद्ध्वा बालैरपि संस्कृतं क्रियते[2] ॥ २ ॥
या वक्तुं किमपि भवेदिच्छा या (सा) कीर्तिता विवक्षेति ।
तदनु च तदनुगतं यद् भाषितमिह तां [3]वदन्त्युक्तिम् ॥ ३ ॥
सा च [4]स्वपरविवक्षानुगताकांक्षानिवृत्तिमुत्पाद्य ।
लोकानां व्यवहारे हेतुः स्यादिन्द्रियाणीव ॥ ४ ॥
तस्मात् तया प्रबोधो यावत्या यादृशा च सर्वस्य ।
भवति व्यवहारविधौ लोकैः [5]सा [ता]दृशी क्रियते ॥ ५ ॥
देशे देशे लोको वक्ति गिरा भ्रष्टया यथा (°या) किञ्चित् ।
सा तत्रैव हि संस्कृतरचिता [6]वाच्यत्वमायाति ॥ ६ ॥
तत्र च वक्तृविवक्षावशाद्[7] गिरः सुप्-तिङन्तपदसंज्ञाः ।
संमिश्रा जायन्ते तासां चिह्नं पृथग् वक्ष्ये[8] ॥ ७ ॥

1 मूलादर्शे-बहिःकृतं । 2 क्रियते । 3 ता वदन्त्युक्तिः । 4 स्वपरि° । 5 शादृशी° । 6 वाच्यत्वा° । 7 °वशात् । 8 वक्ष्ये ।

व्यापारो धात्वर्थः कर्तृगतोऽकर्मकस्य भिन्नस्तु[1] ।
इतरस्योक्तिस्पष्टत्रिकालविषयः प्रयोज्यः स्यात् ॥ ८ ॥

'आथि' इति कर्तृनिष्ठा 'कीज' इति साध्यगा क्रिया तस्मात् ।
'अस्ति-करोती' धातू अकर्मक-सकर्मका एवम् ॥ ९ ॥

'कर' 'किएसि' 'करिह'काला: संप्रति-गत-भाविनः स्फुटा उक्तेः ।
एषु च 'कर' इत्युक्तौ विज्ञेया [पत्र १, पार्श्व २] वर्तमानेव ॥ १० ॥

[2]ह्यस्तन्यद्यतनी वा 'किएसी'त्युक्तौ तथा परोक्षा च ।
'जइ पावंत' 'तव करत' क्रियातिपत्ति[रि]ति[3] चोक्तिः ॥ १[१] ॥

'करिह' इति भविष्यन्ती [4]श्वस्तन्याशीश्च कीर्तिता उक्तौ ।
आशिषि च पञ्चमी स्यादङ्गीकारे तथानुमतौ ॥ १२ ॥

'करउ' इति सप्तमी स्यात् पञ्चम्यथवा तथैव मा-योगे ।
ह्यस्तन्यद्यतनी[5] वा स्नेनातीतेऽपि चा[द्या] स्यात् ॥ १३ ॥

अथ शन्तृङानशाविह विज्ञेयौ[6] 'करत आच्छ' इत्युक्तौ ।
'करि आच्छ' इति क्त्वा, णं 'करि करि आच्छ' प्रयोज्यः स्यात् ॥ १४

'करवें आच्छ' तुम् भवेत्, यदि वाऽयं करण [या] इतीहोक्तौ ।
शेषास्त्वनुदितभेदाः 'कर' इत्युक्तौ वुणाद्या ये ॥ १५ ॥

निष्ठा-क्वन्सुप्रमुखा [7]अतीतकालोदितास्तु ये कार्त्ताः ।
तेषामुक्तिः 'किएसी'त्येषैव हि सर्व्वतो ज्ञेया ॥ १६ ॥

शत्राणौ(नौ) तु स्यथुतौ विज्ञेयौ 'करणिहार आच्छे'ति ।
व्यापारोक्तेरन्ते वश्चेत् कृत्यास्तदा योज्याः ॥ १७ ॥

---

1 भिन्नस्तु । 2 ह्यस्तन्य° । 3 क्रियातिपत्तेति । 4 श्वस्त° । 5 °न्यन्यतनी । 6 विज्ञेये । 7 अतीत°

इत्युक्तयो मयोक्ताः करोतिना सर्वधातुविषयत्वात् ।
तस्मादमुनैव यथा शेषार्था धातवश्चोह्याः ॥ १८ ॥

॥ इति क्रियोक्तिव्यक्तिः ॥

ॐ

[२. कारकोक्तिव्यक्तिनामकप्रकरणम् ।]

तस्य निमित्तं यत् पुनरुक्तौ तत् कारकं हि लिङ्गोक्तम् ।
व्यापारभेदभिन्नं ज्ञात्वा तज्ज्ञैः प्रयोज्यं स्यात् ॥ १९ ॥
यः कारकः स कर्त्ता प्रेर्यश्चेत् प्रेरकस्य हेतु [प०२, पा०१]त्वम् ।
तत्रेनन्तो धातुः सम्बोध्यः संमुखीकरणे ॥ २० ॥
कर्म व्यापारफलं येनैतत् साध्यते तत्र (ऽत्र) तत् करणम् ।
'यस्मात्' तदपादानं 'यस्मै' तत् संप्रदानं च ॥ २१ ॥
अधिकरणं त्वाधारोऽथैषामुक्ति[ः] पृथग् यथा लोके ।
जातौ जेथु किहं या(जा)हां जेइं करि जो किछु कीज जेइ केहुं ॥
पुं-स्त्री-नपुंसकत्वं शब्दानां लोकतः परिच्छेद्यम् ।
एकत्व-द्वित्व-बहुताः संख्यास्त्विह संख्यया ज्ञेयाः ॥ २३ ॥
स त्वमहं वा पुरुषा उक्तानुक्तत्वमुक्तितो व्यक्तम् ।
सम्बन्धः स्वीकाराद् विशेषणं तु व्यवच्छेदात् ॥ २४ ॥

॥ इति कारकोक्तिव्यक्तिः ॥ छ ॥

ॐ

[३. उक्तिभेदव्यक्तिनामकप्रकरणम् ।]

उक्तेश्च दश पदार्था उत्पत्तौ मूलमत्र शेषास्तु ।
तत्फलत्वात्तदाश्रयकृतभेदास्ते च कालाद्याः ॥ २५ ॥

---

1 यस्माद्° । 2 °क्ति°

लिङ्गं क्रिया ततोऽपि च कारकषट्कं ततश्च सम्बन्धः ।
आमन्त्रणं च दशमं किन्त्वेतत् केवलं नोक्तौ ॥ २६ ॥
एषां चैकद्व्यादिक्रमेण लोकैर्विवक्षितानां स्युः ।
पञ्चशतान्युक्तीनामेकादशसंयुतान्येव ॥ २७ ॥
कालत्रयमथ च क्त्वा-तुम्-शन्तृङभीक्ष्णतादयो लिङ्गम् ।
संख्या-पुरुषावुक्तानुक्तत्वे भेदहेतवस्तथैषाम्[1] ॥ २८ ॥
एतद्भेदवशात् पुनरुक्तीनां या भिदो न ताः कथिताः ।
यस्माद् धर्मिणि विदिते सुखलभ्यास्तद्गता धर्माः ॥ २९ ॥

॥ इत्युक्तिभेदव्यक्तिः ॥ छ ॥ [प० २-२]

[४. लेखलिखनविधिनामकप्रकरणम् ।]

अथ कथयिष्ये लिखनक्रममिह लेखस्य पूर्वसूरिकृतम् ।
येन प्रबोधितार्थो निरादरो वाचिके लोकः ॥ ३० ॥
स्वस्त्यादिरिति प्रान्तस्तिथि-वारसमर्थितो भवति लेखः ।
स्पष्टाक्षरः स्फुटार्थो वार्तासमसंस्कृताऽऽत्मा च ॥ ३१ ॥
प्रस्थाप्यते यतोऽसौ पञ्चम्यन्तं सदैवतनाम ।
यत्र तु नेयो लेखः सप्तम्यन्तं लिखेत् तदिह ॥ ३२ ॥
लेखप्रस्थापयितुर्नाम्नः प्रथमाऽथवा तृतीया स्यात् ।
यस्य कृते तस्य पुनः षष्ठी देयाद् द्वितीया वा ॥ ३३ ॥
महतः स्थानं नाम च यथोचितं पूर्वमेव लिखनीयम् ।
तदनन्तरमितरस्य श्रीशब्दाद्यं च योग्यत्वे ॥ ३४ ॥
माता पिता पितृव्यो ज्येष्ठो भ्राताऽथ मातुलः श्वशुरः ।
[2]नृप-गुरु-सेव्या विद्या-तपोऽधिकाद्या महान्तोऽमी ॥ ३५ ॥

---

1 °थैषां । 2 नृपकुरु° ।

परमाराध्यतमाद्याः शब्दास्तत्पूर्वतोऽनुरूपा ये ।
राज्ञस्तु महाराजाधिराजराजावलीपूर्वाः ॥ ३६ ॥

पितृ-गुरवश्चरणान्ता बहुवचनान्तास्तथेतरमहान्तः ।
पितृ-गुरुशब्दैश्चैतेन सञ्ज्ञयाऽन्ये[1] यथायोग्यम् ॥ ३७ ॥

अथवाऽप्यमेकनाम्ना लिखनीयो यत्र साम्यमुभयो[ः] स्यात् ।
भृत्य-ग्राम्य-कनिष्ठादिष्वपि चायं विधिर्दृष्टः ॥ ३८ ॥

अभिवादनप्रणामा वाऽऽशी [प० ३, पा० १] राश्वासनं यथायोग्यम् ।
विज्ञापयति कुशलयति वार्त्तयति समादिशत्यादि ॥ ३९ ॥

प्रोञ्छितलिखितो[2] श्लिष्टो बहुभिर्लिखितोऽन्यजातिबन्धनकः ।
हस्तेऽर्पितश्च दुष्टा(°ष्टो)गौडानां ह्यधिकपङ्क्तिश्च ॥ ४० ॥

॥ इत्युक्तिव्यक्तौ लेखलिखनविधिः ॥ ४ ॥

*

[५. व्यावहारिकलेखपत्रलिखनक्रमनामकप्रकरणम् ।]

दत्ताधत्त-क्रीतं वस्तु स्याद् यत्प्रसादतः सुलभम् ।
पुरुषान्तरेऽपि तमहं पत्रे लिखनक्रमं वक्ष्ये ॥ ४१ ॥

निजदेश-नृपतिराजावलीक्रमं तदनु वत्सरं विदितम् ।
मासं पक्षं च लिखेत् तिथि-वारयुतं ततः स्थानम् ॥ ४२ ॥

दातृ-ग्राहक-मध्यक-साक्षिगणा लेखकश्च पञ्चैते ।
पुरुषाः पत्रे लेख्याः पित्रा जात्या स्वनाम्ना च ॥ ४३ ॥

जियत्पितृकस्य लिखेत् पितृनामादावथापरस्य पुनः ।
पश्चादथ वित्तमिर्तिं नाणकनाम्ना ततो वृद्धिम् ॥ ४४ ॥

---

1 संज्ञयाऽन्ये । 2 ° लिखतो ।

दातृ-ग्राहकसमयः स्वहस्तदानं च साक्षिणस्तदनु ।
तेषां स्वहस्तदानं लेखकनामाथ संकलनम् ॥ ४५ ॥

पालकपत्रं च तथा दायकहस्तेऽथ पालकस्यापि ।
अन्योऽन्यसमयपालननिबन्धनं सस्वहस्तं च ॥ ४६ ॥

पश्चा(श्व)नामित्वमिदं पत्रं साधारणं प्रमाणं स्यात् ।
एक-द्व्यङ्गोज्झितमपि भवेत् प्रमाणं कृतं शिष्टैः ॥४७॥ [प०१, पा०२]

यत्तु स्वल्पफलं स्यात् कतिपयदिवसोपयोगिशिष्टकृतम् ।
पत्रं तत् स्मरणार्थं प्रमाणमुपयुक्तनामधनम् ॥ ४८ ॥

इत्युक्तमृणाऽऽदाने पत्रं वृद्ध्या परत्र तु विशेषः ।
क्रय-बन्धकादिपत्रे यस्तमहमुदाहृतौ वक्ष्ये ॥ ४९ ॥

लेखपत्रलिखनक्रमानुगाः पञ्जिकोपगतपट्टचीरकाः ।
शासनं च किल भुण्डिकान्यथा सत्तु तत्र तदुदाहरिष्यते ॥५०॥

॥ इति दामोदरोदीरितोक्तिव्यक्तिकारिकाः समाप्ताः ॥

पण्डितवरदामोदरविरचितं

उक्तिव्यक्तिप्रकरणम् ।

[स्वोपज्ञव्याख्यासहितम्]

॥ ॐ नमः सर्वविदे ॥

गणानां नायकं नत्वा हेरम्बममितद्युतिम् ।
उक्तिव्यक्तौ विधास्यामो विवृतिं बाललालिकाम् ॥

तत्रादौ इष्टदेवतानमस्कारव्याजेन विवक्षितवस्तुस्वरूपं निर्दिशन्नाह[2]—

नानाप्रपञ्चरचनाबहिष्कृतं[3] सारभूतमेकं यत् ।
नत्वा तत्त्वं वाचामुक्तिव्यक्तिं विधास्यामः ॥ १ ॥

वाचां तत्त्वं=वाग्ब्रह्म नत्वा । कीदृशं तत् । नाना=बहुप्रकारा येयं संसारप्रपञ्चस्य [प० ४-१] रचना=सृष्टिप्रकारस्ततो बहिष्कृतं=पृथग्भूतं वस्त्वन्तरमित्यर्थः । यतः सारभूतं=सत्यं विद्यास्वरूपमित्यर्थः । एकं=न तद् द्वितीयमस्तीति[4] हि ब्रह्मविदः । संसारप्रपञ्चस्त्वयमविद्यास्वरूपोऽसत्यः स्वप्नमायो बहुभेदश्च । अतः परं तत्त्वं नत्वा उक्तेः=भाषितस्य, व्यक्तिं=प्रकटीकरणं विधास्यामः—अपभ्रंशभाषाछन्नां संस्कृतभाषां प्रकाशयिष्याम इत्यर्थः ।

अर्थान्तरमपि यथा—उक्तिव्यक्तिम्—उक्तिव्यक्तिस्वरूपं वाचां तत्त्वं नत्वा, उक्तिव्यक्तिमेव विधास्याम इति सम्बन्धः । व्यक्तिशब्दोऽयं भावसाधनो[5]ऽपि तद्विशिष्ट[6]संस्कृतशब्दविषयोऽत्र द्रष्टव्यः । उक्तावपभ्रंशभाषिते व्यक्तीकृतं संस्कृतं नत्वा तदेव करिष्याम इत्यर्थः । तच्च कस्मिन्निह नानाप्रपञ्चरचनाबहिष्कृतं करणीयम् । नानाप्रकारा येयं प्रपञ्चरचना संस्कृतशब्दविद्यार्थे[7] अनेकव्याकरणप्रक्रियारचना तद्बहिष्कृतं[8] तन्निरपेक्षम् । विराम्याभ्यासमन्तरेणापि[9] शब्दसारं गृह्णातु पर्योत्सार्य [प० ५-१] वार्तामात्रकथनेनेत्यर्थः । यत एवं सारभूतं ... । शब्दशास्त्राणां प्रपञ्चस्यापि ... । तथा एकं ... ... । नानाप्रकारा प्रतिदेशं भिन्ना येयमपभ्रंशवाग्रचना पामराणां ... बहिष्कृतं [10]ततोऽन्यादृशम् । तद्धि [11]मूर्खप्रकल्पितं प्रतिदेशं नाना ।

मूलप्रतौ निम्नलिखितपाठाः—1 ... । 2 °निर्दिशन्नाह° । 3 °बहिःकृतं° । 4 °स्तीति° । 5 °साधनो° । 6 °संस्कृत° । 7 °विद्यार्थे° । 8 °कृतं° 9 °न्तरेण° । 10 °ततो° 11 °मूर्ख° ।

¹संस्कृतं तु ²सर्वत्रैकं । तथा तत् फल्गुस्वरूपमनुपादेयमव्यवस्थितम्, एतत् तु सारभूतं³ दिव्यस्वरूपम् । तथा तदनेकं प्राकृत-अपभ्रंश-पैशाचिकादिभेदभिन्नम् । एतत् पुनरेकस्वरूपमेवेत्यर्थः ॥ छ ॥

अथ ⁴श्रोतृप्रवृत्त्यङ्गं शास्त्रप्रयोजनमाह –

स्यादि-त्यादी वृत्त्वा श्रुत्वा लिङ्गानुशासनं किञ्चित् ।
उक्तिव्यक्तिं बुद्ध्वा बालैरपि संस्कृतं क्रियते ॥ २ ॥

स्यादिश्च त्यादिश्च ते वृत्त्वा स्यादि-त्यादिसञ्ज्ञयोर्बालव्युत्पत्तिशास्त्रयो रूपसिद्धिं कृत्वेत्यर्थः । किञ्चिदेकतमं लिङ्गानुशासनं पुं-स्त्री-नपुंसकत्वं शब्दानां येन शास्त्रेणानुशास्यते शिक्ष्यते [त]च सर्ववर्म्मकृतमन्यद्वा, श्रुत्वा गुरोरधिगम्य । एतावत्येव शब्दशास्त्राभ्यासापेक्षा प्रायेणात्रेत्यर्थः । एतावत्यां च सामग्र्यां सत्याम्, उक्तिव्यक्तिमुक्तिव्यक्तिसञ्ज्ञमिममन्वयोत्पत्त्युपायं [प० ६-१] बुद्ध्वा = सम्यगवगम्य बालैरपि = अप्रगल्भैरपि, किमुच्यते प्रगल्भैः, संस्कृतं क्रियते = संस्कृतभाषया जल्प्यत इत्यर्थः ॥ छ ॥

ननु केयमुक्तिर्नामेत्याह –

या वक्तुं किमपि भवेदिच्छा सा कीर्तिता विवक्षेति ।
तदनु च तदनुगतं यद् भाषितमिह तां वदन्त्युक्तिम् ॥ ३ ॥

किमपि जगति व्यवह्रियमाणं वस्तु वक्तुं = अभिधातुं या इच्छा सा विवक्षा । तदनु विवक्षोत्पत्तेरनन्तरं तदनुगतमभीष्टविषयाश्रयं⁵ यद् भाषितं = भाषणं वाग्व्यापारः, तां वदन्त्युक्तिं = तस्मिन्नर्थे प्रयुञ्जते अत्रोक्तिशब्दं छात्रा इत्यर्थः ।

सा चोक्तिः किमर्थं क्रियत इत्याह –

सा च ⁶स्वपरविवक्षानुगताऽऽकांक्षानिवृत्तिमुत्पाद्य ।
लोकानां व्यवहारे हेतुः स्यादिन्द्रियाणीव ॥ ४ ॥

सा चोक्तिर्द्विविधा लोकव्यवहारे दृश्यते । स्वविवक्षानुगता, परविवक्षानुगता च । यतो यत्रैकान्ते ⁷कश्चिदेक एव, तत्र किं लोकव्यवहारार्थेन वाग्व्यापारेण, प्रबोध्याभावात् । अनेकजनसमवाये च यो वाग्व्यापारो व्यवहारनिमित्तः, स उक्ति-प्रत्युक्तिस्वरूप एव । यत एकः स्वाभिमतं प्रकटयत्यपरस्तदनुगतमुत्तरं ददाति । एवं हि व्यवहारः [प० ५-२] प्रवर्तते । तयोश्च ये उक्ति-प्रत्युक्ती ते स्व-परविवक्षानुगते एवार्थात् । अन्यथा व्यवहारासंभवात् । अत उक्तं सा च स्वपरविवक्षानुगतेति । आकांक्षानिवृत्तिमुत्पाद्येति – उक्तस्य प्रत्युक्तस्य वा परेण कथ्यमानस्याभिप्रायमवगन्तुं या इच्छा साऽऽकांक्षा, तस्याश्च निवृत्तिः

---

1 °संस्क° । 2 °सर्व° । 3 °स्वासार° 4 °श्रोत्रि° 5 °श्रयं° । 6 °स्वपरि° । 7 °कान्ते कश्चिदेकान्ते कश्चिदे° ।

पराभिप्राये अवगते भवति। उक्ति-प्रत्युक्त्योश्च विभिन्नत्वं एव। यावदाकांक्षानिवृत्तिर्नोत्पद्यते तावद् वक्ता प्रतिवक्ता वा पुनः पुनः पृच्छति; यथा – किं वदसीति; यावदाकांक्षानिवृत्ति-र्भवति। पृष्टो आकांक्षानिवृत्तिपर्यन्तं बोधयति, इतरथा व्यवहाराभावात्। एवं चाकांक्षा-निवृत्तिमुत्पाद्य लोकानां व्यवहारे प्रवर्तन-निवर्तनादिस्वरूपे हेतुर्निमित्तं स्यात्; तया विना तदभावात्। अतश्चेन्द्रियाणीव। यथा चक्षुरादीनि बुद्धीन्द्रियाणि[1] स्रक्चन्दनादिष्वहि-कण्टकादिषु वा विषयेषु स्वस्वव्यापारेण निश्चितं ज्ञानमुत्पाद्य प्रवृत्तौ निवृत्तौ वा कारणं भवति एवं वागिन्द्रियमपि इत्यर्थः॥ छ॥

एवमुक्तेः स्वरूपमुक्त्वा अनुमेयार्थं स्पष्टयन्नाह[2] –

तस्मात् तया प्रबोधो यावत्या यादृशा च सर्वस्य।
भवति व्यवहारवि [प० ६-१] धौ लोकैः सा तादृशी क्रियते॥५॥

यस्मादेवं तस्माद्धेतोः, तया उक्त्या प्रबोधः = आकांक्षानिवृत्तिः, यावत्या एकानेकपदात्मि-कया, सकृदसकृदुच्चारितया वा, यादृशा च प्रसिद्धशब्दात्मिकया, व्यवहितसम्बन्धादिदोष-रहितया वा, सर्वस्य व्युत्पन्नाव्युत्पन्नस्य, व्यवहारविधाविति कर्तव्यतानुष्ठाने, लोकैर्लोकव-र्तिभिः, तावती तादृशी च क्रियते। अन्यथा व्यवहारासिद्धेः। अत एवोक्तम् –

'इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥' इति।

एतेन चोक्तिरेव भगवती संसारस्थितिमूलमिति प्रतिपादितं भवति॥ छ॥

अथोक्तिव्यक्तिं बुद्ध्वा बालैरपि संस्कृतं क्रियत इति यदुक्तं तद् द्रढयन्नाह –

देशे देशे लोको वक्ति गिरा भ्रष्टया यया किंचित्।
सा तत्रैव हि संस्कृतरचिता वाच्यत्वमायाति॥ ६॥

प्रतिदेशभिन्ना येयं सर्वजनसाधारणा भाषा गावी गोणी प्रभृतिका[4] सोऽपभ्रंश उच्यते। सा[5] च संस्कृतभाषामुच्छिद्य प्रवृत्ता। तुरुष्कदेशे द्विजातिजातिं तुरुष्कजातिरिव। ततो देशे देशे प्रतिविषयं लोकः पामरजनो यया यया गिराऽपभ्रष्टया यत् किंचिदभिधेयं वस्तु वक्ति [प० ६-२] व्यवहरति साऽपभ्रंशभाषा, तत्रैवार्थे संस्कृतरचिता संस्कृतशब्दवाच्येन स्वरूपेण प्रयुक्ता प्रयोगं नीता, वाच्यत्वमायाति। यथा वक्तुमिष्टं स्यात् तादृशी पदसन्त-तिर्वाच्यमिति लक्षणेन व्याप्यते। यदि वा वाच्यत्वमावात्यभिधेयत्वं प्रतिपद्यते उपादेया भवतीत्यर्थः। यां संस्कृतभाषामुच्छिद्य याऽपभ्रंशभाषा प्रवृत्ता तस्याः स्थाने यदा सैव संस्कृतभाषा पुनः परिवर्त्य प्रयुज्यते तदाऽपभ्रंशभाषैव दिव्यत्वं प्राप्नोति। पतिता ब्राह्मणी कृतप्रायश्चित्ता ब्राह्मणीत्वमिति चेति॥ छ॥

---

1 बुद्धीन्द्रि°। 2 स्पष्टयं आह। 3 'इत्यते'। 4 °को°। 5 सा च संस्कृ°।

एवं वस्तुसङ्क्षेपेण प्रस्तुते योजयन्नाह[1] —

तत्र च वक्तृविवक्षावशाद् गिरः सुप्-तिङन्तपदसंज्ञाः ।
संमिश्रा जायन्ते तासां चिह्नं पृथग् वक्ष्ये ॥ ७ ॥

तत्र चापभ्रंशे वक्तृविवक्षावशाद् वक्तुः = प्रयोक्तुः किंचिदभिधेयं वस्तु व्यवहर्तुकामस्य या विवक्षा तद्वाचकं शब्दं वक्तुमिच्छा तद्वशात्तदधीनत्वम् । गिरः — अपभ्रष्टाः शब्दाः, सुप्-तिङन्तपदसंज्ञाः = स्याद्यन्त-त्याद्यन्तपदवाच्याः, संमिश्राः = परस्परानुविद्धा जायन्ते प्रयुज्यन्ते । तासां गिरां चिह्नं लक्षणं पृथक् प्रत्येकं वक्ष्ये कथयिष्ये(°ष्यामि ?) । एतेनैतदुक्तं भवति [प० ७-१] यान्येव संस्कृतभाषायां सुप्-तिङन्तानि पदानि तान्येवापभ्रंशेऽपि न चार्थे मनागपि भेदः । केवलमक्षरेषु विपर्ययः । तद्वशाच्च कृतवेषा नटीवापभ्रंशच्छन्ना संस्कृतभाषा न लक्ष्यते । अक्षरान्यथात्वे हि कतमस्यापभ्रंशस्य स्थाने कतमत्यं संस्कृतं पदमिति निश्चयः अकृतसंकेतस्याशक्यानुष्ठान एव । तस्मादपभ्रष्टत्वेऽपि यः संस्कृतपदस्याव्यभिचारी धर्मः स[2] कथ्यत इत्यर्थः । तेन च ज्ञातेन येऽपभ्रंशशब्दा येषां क्रियाकारकसम्बन्ध[3]वाचिनां संस्कृतशब्दानां स्थाने जातास्तेषां स्थाने तत्प्रयोगे संस्कृतं प्रवर्तत एव । दृश्यते हि द्रविडदेशजातस्य[4] मध्यदेशे वसतस्तद्भाषाज्ञानं संकेतग्रहणे । दृश्यते च बालानां [5]स्वस्वदेशभाषाज्ञानमप्रयत्नत एव । अतोऽपभ्रंशविदः संकेतग्रहणात् का नाम संस्कृतज्ञानेऽनुपपत्तिः । तस्मादुक्तिर्व्यक्ति विधास्याम इति ॥ छ ॥

अथ तामेवोपक्रममाणः क्रियायास्तावदाह —

व्यापारो धात्वर्थः कर्तृगतोऽकर्म्मकस्य भिन्नस्तु ।
इतरस्योक्तिस्पष्टत्रिकालविषयः प्रयोज्यः स्यात् ॥ ८ ॥

व्यापार इति भावसाधनं देहाभिधस्येन्द्रियसमुदायस्य चेष्टोच्यते [प० ७-२] । स चेदपभ्रंशे[6] प्रयुक्तो दृश्यते तदा स धात्वर्थो ज्ञेयः । तस्य स्थाने क्रियापदं प्रयोज्यमित्यर्थः । तच्च त्याद्यन्तं कृदन्तं वा विवक्षावशादेव । स च व्यापारः अचेतनकर्तृको भवतु सचेतनकर्तृको वा भवतु । यत्र कर्तृगतः प्रतीयते स धातुरकर्मको ज्ञेयः । यस्य भिन्नः कर्तुरर्थान्तरगतः स इतरस्य सकर्मकस्य; अर्थात् कर्मद्वयगतो द्विकर्म[क]स्येति । तथोक्तिस्पष्टा ये त्रयः काला वर्तमानातीतानागतास्तद्विषयस्तत्सम्बद्धः[7] प्रयोज्यः स्यात् । एतदुक्तं [भवति] । लोकः किल व्यापारार्थं शब्दमेकतरकालाश्रितमेव परं प्रयुङ्क्ते न तन्निरपेक्षम्, क्रियायाः कालप्रतिबद्धत्वात् । ते च कालास्तथैवोक्त्या तथा कथ्यन्ते यथा बालोऽपि जानाति । यत्कालविषया च लोकोक्तिस्तद्विहितप्रत्ययान्तेन तदर्थेन धातुना स व्यापारः प्रयोक्तव्यो भवेदर्थादेव । तद्यथा-लोकोदाहरणैर्व्यक्तिः ॥ छ ॥

---

1 योजयं साह । 2 स । 3 °सबंध° । 4 जातस्य । 5 स्वस्व° । 6 °भ्रंशे । 7 °विषयस्तत्सं°बद्धः ।

अथ व्यापारो धात्वर्थ इत्युक्तस्तोऽनुमर्थेमपभ्रंशभाषयोपदर्शनिदं [illegible] आह—

'आथि' इति कर्तृनिष्ठा 'कीज' इति साध्यगा क्रिया तस्मात् ।
अस्ति-करोती धातू अकर्मक-सक[प॰ ८-१]र्मका एवम् ॥ ९ ॥

अपभ्रंशभाषया लोको वदति यथा—'धर्मु आथि' 'धर्मु कीज'—एवं चोक्ते श्रोतुर्लोकस्य बोधो यथा—धर्मः अस्ति, धर्मः क्रियत—इति । अत 'आथि' 'कीज' इति व्यापारवाचकौ शब्दौ क्रियापदशब्देनोच्येते । प्रथमवाक्ये च 'धर्म्म' इति कर्तृपदम्, 'अस्ती'ति क्रिया च तद्गता प्रतीयते । तथाहि—धर्मः अस्ति, भवति, विद्यते, सत्तावान्, अभावव्यावृत्त इत्यादिपर्यायाः । द्वितीये च वाक्ये धर्मः साध्यत्वेन विवक्षितः, क्रियत इति करणक्रिया च तद्गता प्रतीयते । धर्मः क्रियते, उत्पाद्यते, अविद्यमानः साध्यते, आविष्क्रियते चेत्यादिपर्यायाः । यत एवं तस्माद्धेतोरस्ति-करोती धातू । अस भुवि, डुकृञ् करणे ।[1] एतौ यथासंख्यमकर्मक-सकर्मकौ । अयादीनां यवलोपः पदान्त इति वलोपे प्रयोगः । एवं चाकर्म्मक-सकर्म्मका एवमिति बहुवचनान्तमपि योज्यम्, काकाक्षिगोलकन्यायेन । अपरेऽपि चाकर्म्मक-सकर्म्मका धातव एवमनेनैवास्ति-करोतिक्रमेण बोद्धव्या इत्यर्थः । यत्र चार्थद्वयगतः स द्विकर्मको यथा—'दुह गावि द(? दू॰)धु गुआल'—दोग्धि गां दुग्धं गोपालकः । दुह प्रपूरणे । 'याच कांबल [प॰ ८-२] यजमान कापडि'—याचते कम्बलं यजमानं कार्पटिकः ।[2] इत्यादि । अकर्म्मक-सकर्म्मकयोश्चोक्तावयं विशेषो यदात्मनेपदानि भावकर्म्मणोरित्यनेन यदात्मनेपदं तदकर्म्मकस्य प्रयोगे भावोक्तावेव भवति । यथा—भूयते धर्म्मेण, स्थीयते निरुद्यमेन, श्रूयते सालस्येनेत्यादि । सकर्म्मकस्य तु भावे कर्म्मणि च । यथा—ग्रामो गम्यते, धर्मः क्रियत इत्यादि । यथा—दुह्यते गौः दुग्धं गोपालेन, याच्यते कम्बलं यजमानः कार्प्पटिकेनेत्यादि । अविवक्षितकर्म्मकाच्च सकर्म्मकादपि भावेऽपि । यथा—[3]

> दीयतां गृह्यतां तावत्, खाद्यतां पीयतां जनैः ।
> जीवात्मा सुस्थितो या[व]त्, क तस्यावसरः पुनः ॥ इत्यादि ।

अपरेष्वपि चाकर्म्मक-सकर्म्मकप्रयोगाः कियन्तोऽपि दर्श्यन्ते । यथा—'गांग न्हाए धर्मु हो, पापु जा'—गङ्गायां स्नाते धर्मो भवति, पापं याति[4] । 'धर्मे बाढत पापु ओहट'—धर्म्मे वर्द्धमाने पापमवघटते । 'धर्म्मे सव व्यवहार पअट'—धर्मेण सर्वो व्यवहारः प्रवर्तितः[5] । 'पृथिवी धर'[6] पृथ्वी धरति, 'मेहं वरिस' मेघो वर्षतीत्यादयोऽचेतनव्यापाराः प्रयोज्याः । सचेतनव्यापारा [प॰ ९-१] स्त्विन्द्रियनिर्व्वर्त्या एव । इन्द्रियेषु च रूप-रस-गन्ध-स्पर्श-शब्दानां ग्रहणं नेत्र-रसना-घ्राण-त्वक्-श्रोत्राणां बुद्धीन्द्रियाणां व्यापारः । भाषण-आदान-चङ्क्रम-उत्सर्ग-आनन्दाश्च वाक्-पाणि-पाद-पायु-उपस्थानाम् । उभयाधिष्ठातृ मनः स्मरणादिव्या[पा]रस्[6] । एते

1 °भवति । 2 भवति । 3 प्रवर्तितो । 4 [illegible] 5 बुद्धि° । 6 °व्यापारम् ।

च व्यापाराः प्रत्येकमपभ्रंशेन लोकैः प्रयुज्यन्ते । तेषु च तदर्था धातवः प्रयोज्या इति भावः । अत उक्तम्—'व्यापारो धात्वर्थ' इति । तत्र यथा—'आंखि देख'—अक्ष्णा वीक्षते, अक्षिभ्यां वा । ईक्ष दर्शनाह्वानयोः (?) । चक्षुषा वा, नेत्रेण वा, लोचनेन वा, दृशा वेत्यादि । एवं पश्यति, दृशिक् प्रेक्षणे । आलोकते, लोकृ तोत्रि (?लोचृ) दर्शने । 'निहाल'—
5 निभालयते, भल परिभाषणे । एवमन्येऽपि त्याद्यन्तेन । कृदन्तेन त्वक्तयोर्यथा—'आंखि देखत आछ'—अक्ष्णा वीक्षमाण आस्ते, पुरुषश्चेत् । स्त्री तु वीक्षमाणा । कुलं तु वीक्षमाणम् । एवं पश्यन्, पश्यन्ती, पश्यत् । आलोकयन्, आलोकयन्ती, आलोकयत् । एवमन्यत्रापि ज्ञेयम् ॥ छ ॥

'जीभें चाख'—जिह्वया स्वादति । स्वाद भक्षणे, अथवा भक्ष अदने । चाख चीख एते तु
10 देशिपदे । रशनया वा [प० ९-२] लोलया वा, आस्वादयति वा, स्वदते वा । ष्वद स्वाद आस्वादने । एवं—'जीभें चाखत आछ'—जिह्वया स्वादन्नास्ते । स्त्री तु स्वादन्ती, कुलं स्वादत् । एवं भक्षयन्, भक्षयन्ती, भक्षयदिति ।

'नाकें सूंघ'—नासिकया सिंघति । सिघि आघ्राणे । 'सूंघत आछ'—सिंघन्नास्ते । स्त्री तु सिंघन्ती, कुलं सिंघत् । घ्राणेन वा । अथवा जिघ्रति । जिघ्रन्, जिघ्रन्ती, जिघ्रत् । घ्रा
15 गंधोपादाने ।

'हाथें छुअ'—हस्तेन छुपति, हस्ताभ्यां वा । स्पृशति वा । छुपन्नास्ते, छुपन्ती वा, छुपद्वा । स्पृशन्नास्ते, स्पृशन्ती, स्पृशद्वा । छुप स्पृश संस्पर्शे । 'अंकवालि दे'—अंकपालिं ददाति, आलिङ्गति वा । रिगि लिगि गत्यर्थाः । उपसर्गादर्थान्तरम् । स्वजते वा । ष्वजु परिष्वङ्गे । अवगुंडति वा । गुडि मडि वेष्ट वेष्टने । 'मुहं चूंब'—मुखे चुंबति । चुबि वक्त्रसंयोगे । 'सेजं
20 ओंलर'—शय्यायामवललति । लल ईप्सायाम् । 'कोलं ले'—क्रोडे गृह्णाति । ग्रह उपादाने । 'वैसार'—उपवेशयति । 'आंकम धर'—आक्रमणेन धरति । धृ धारणे । 'कांध ले'—स्कन्धे गृह्णाति वहति वा । 'पीठिं चडाव'—पृष्ठे चढापयति । 'गींम धरि [प० १०-१] पेल'—ग्रीवायां धृत्वा प्रेलयति । इल प्रेरणे । 'गलें चाप'—गले चपति । चप सान्त्वने । 'चूतडं तलं देइ वइस'—स्फिजोस्तले दत्त्वोपविशति । विश प्रवेशने । एवमन्येऽपि त्वगिन्द्रियव्यापाराः
25 प्रयोज्याः । तस्य सर्वदेहव्यापित्वात् । हस्तेन स्पृशतीत्यादिषु च हस्तादिगतं त्वगिन्द्रियं हस्तादिशब्देनोच्यते । तस्यैव स्पर्शग्रहणे अधिकारात् । पादघातादयश्च स्पर्शप्रकारा एव । यदुक्तम्—"स्पृशन्नपि गजो हन्ती"ति ॥ छ ॥

'काने सुण'—कर्णेन शृणोति, कर्णाभ्यां वा । शृण्वन्नास्ते, शृण्वती, शृण्वद्वा । श्रु श्रवणे । श्रवणेन वा, श्रोत्रेण वा । आकर्णयति वा । छिद्र कर्णवेधे । अवधारयति वा ।
30 धृञ इति रूपम् ।

एवमन्येऽपि बुद्धीन्द्रियाणां व्यापाराः प्रयोज्याः । एषु च प्रयोगेषु चक्षुरादीनां प्रयोगा लोके क्रियन्ते तेन दर्शिताः । अन्यथा तु निरर्थका एव दर्शनादीनामनन्यविषयत्वात् ॥ छ ॥

अथ कर्मेन्द्रियाणाम्, यथा — 'बोलें बोल' — वाचा वदति । वागिन्द्रियेणेत्यर्थः । 'बोल बोल' — वाचं वदति । 'बोलत आछ' — वदन्नास्ते, स्त्री तु वदन्ती, [प० १०-२] कुलं वदत् । अथवा बोलं बोलतीत्येवमेव प्रयोज्यम् । बुल निमज्जन इत्यस्यानेकार्थत्वात् । एवं 'संमास' — संभाषते । 'संमासत[1] आछ' — संभाषमाण आस्ते, स्त्री तु संभाषमाणा, कुलं संभाषमाणम् । भाष व्यक्तायां वाचि । 'आवर्ज' — आवर्ज्जति । वृजी वर्ज्जने । 'आश्वास' — आश्वासयति । श्वस्[2] प्राणने । 'चुचुकार' — चुटचुटकारयति; अव्यक्तानुकरणम् । तथा 'हकार' — अकारयति । 'राव' — रावयति । टुक्षु रुक्षु शब्दे । 'गोहराव' — देशिपदम्; आह्वयतीत्यर्थः । ह्वेञ स्पर्द्धायां वाचि[च] । 'वच' — वक्ति । 'बचाव' — वाचयति । वच परिभाषणे । 'पढ' — पठति । पठ व्यक्तायां वाचि । 'गुण' — गुणति । कुण गुण आमन्त्रणे । एवमन्येऽपि वाग्व्यापाराः प्रयोज्याः ॥ छ ॥

'हाथें ले' — हस्तेन गृह्णाति, हस्ताभ्यां वा । यदि वा लाति । रा ला आदानेऽपि लोके । 'हाथं ले' — हस्ते गृह्णाति, आदत्ते वा । डुदाञ दाने । 'दूं हाथें खजुहाव' — द्वाभ्यां हस्ताभ्यां खर्ज्जति । खर्ज मार्जने । 'कंरोव' — कोरयति । कुर शब्दे, अनेकार्थत्वात् । 'कुंदुआव' — कंदूयते । कंदूय सौत्रो धातुः । 'मींड' — मीडति । मील निमेषणे[3] । एवमन्येऽपि हस्त[प० ११-१] व्यापाराः प्रयोज्याः ॥ छ ॥

'पायं जा' — पादेन याति । 'जान्त आछ' — यानास्ते, स्त्री तु यान्ती, कुलं यात् । यदि वा गच्छति । गच्छन्, गच्छन्ती, गच्छत् । व्रजति । व्रजन्, व्रजन्ती, व्रजत् । गम्लृ सृप्लृ गतौ । वज व्रज गतौ । चरणेन वा अंह्रिणा वा । तथा 'धाव' — धावति । धावु गति-शुद्ध्योः । अटति । अट पट गतौ । प्रतिष्ठते । स्था गतिनिवृत्तौ; उपसर्गादर्थान्तरे । भ्रमति । भ्रमु चलने । चलति । चल प्रतिष्ठायाम् । एवमन्येऽपि पादव्यापाराः प्रयोज्याः ॥ छ ॥

'हग' हदने । हद पुरीषोत्सर्गे । 'हगत आछ' — हदमान आस्ते, स्त्रियां हदमाना, कुलं हदमानम् । 'रेच' — रेचति, रेचयति वा । रिच वियोजन-संपर्चनयोः । रिचिर विरेचने, अस्य तु रिणक्ति । 'पाद' — पर्द्दते । पर्द कुत्सिते शब्दे । 'वाउ सर' — वातः सरति । सृ गतौ । एवमन्येऽपि पायुव्यापाराः प्रयोज्याः ॥ छ ॥

'जह' जहति । जमु मिथुने । 'गिह' — गृह्णाति, घिण्णते वा । घिणि घुणि ग्रहणे । 'रंव' — रमते । रमु क्रीडायाम् । क्रीडाप्रकारो हि मैथुनम् । 'मूत' — मूत्रयति । मूत्र प्रस्रवणे । 'मूतत आछ' — मूत्रयन्नास्ते, [प० ११-२] स्त्री तु मूत्रयन्ती, कुलं मूत्रयत् । मेहति वा । मिह सेचने । एवमन्येऽप्युपस्थव्यापाराः प्रयोज्याः ॥ छ ॥

इति कर्मेन्द्रियव्यापारा अपरेऽपि[4] द्रष्टव्याः ॥ * ॥

---

1 संभाषत । 2 श्वष् । 3 निमेखणे । 4 अपरेति ।

'मने धाअ'—मनसा ध्यायति । 'सोंअर'—स्मरति । 'विशर'[1]—विस्मरति, प्रस्मरति वा; उपसर्गादर्थान्तरम् । 'धायन्त आछ'—ध्यायन्नास्ते, स्त्री तु ध्यायन्ती, कुलं ध्यायत् । स्मरन्, स्मरन्ती, स्मरत् । स्मृ ध्यै चिन्तायाम् । 'चीन्त'—चीन्तति । चिति स्मृत्याम् । 'कांम'—कामयते । कमु कान्तौ । 'कोह'—कुप्यति । कुप्यन्नास्ते, कुप्यन्ती स्त्री, कुप्यत् कुलम् । एवं क्रुध्यति, रुष्यति । कुप क्रुध रुष रोषे । 'लोभ'—लुभ्यति । लुभ गार्ध्ये । 'माच'—माद्यति । मदी हर्षे । क्षीबति वा । क्षीबृ मदे । 'मान'—मानते । मान पूजायाम् । 'तूस'—तुष्यति । एवं हृष्यति । रु(तु)ष हृष तुष्टौ । एवमन्येऽपि मनोव्यापाराः प्रयोज्याः । एतेषु च प्रयोगेषु कर्त्रादिकार[का]णि[2] न प्रयुक्तान्यविवक्षितत्वात्, ग्रन्थ-गौरवभयाच्च । स्वेच्छया तु प्रयुक्तक्रियासु[3] कर्त्रादिपदं प्रयोज्यमिति । अत उक्तम्—'व्यापारो धात्वर्थः' इति । अवशिष्टव्यापारांश्च कियतोऽपि प्रकी[प० १२-१]र्णके वक्ष्यामः ॥ छ ॥

अथ—'उक्तिस्पष्टत्रिकालविषयः प्रयोज्यः स्यात्' इत्युक्तमतोऽमुमर्थमपभ्रंशोक्त्या स्पष्ट-यन् विभक्तिविभागं च कुर्वन्नार्याचतुष्कमाह—

'कर' 'किएसि' 'करिह' कालाः संप्रति-गत-भाविनः स्फुटा उक्तेः ।
एषु च 'कर' इत्युक्तौ विज्ञेया वर्तमानैव ॥ १० ॥
ह्यस्तन्यद्यतनी वा 'किएसी'त्युक्तौ तथा परोक्षा च ।
'जइ पावंत, तव करत' क्रियातिपत्तेरियं चोक्तिः ॥ ११ ॥
'करिह' इति भविष्यन्ती श्वस्तन्याशीश्च कीर्तिता उक्तौ ।
आशिषि च पञ्चमी स्यादङ्गीकारे तथानुमतौ ॥ १२ ॥
'करउ' इति सप्तमी स्यात् पञ्चम्यथवा तथैव मा-योगे ।
ह्यस्तन्यद्यतनी वा स्मेनातीतेऽपि चाद्या स्यात् ॥ १३ ॥

'कर किएसी'ति । 'कर'—इति यत्रोक्तिस्तत्र संप्रतिकालः = वर्तमान इत्यर्थः । 'किएसि' इति यत्रोक्तिस्तत्र गतः कालः = अतीत इत्यर्थः । 'करिह'—इति यत्रोक्तिस्तत्र भावी कालः = एष्यन्नित्यर्थः । ननु कुतोऽयं नियम इत्याह—'स्फुटा उक्तेः'—लोकोक्तिरेवात्रार्थे प्रमाण-मित्यर्थः । एषु[4] च मध्ये यत्र 'कर'—इत्युक्तिस्तत्र वर्तमानैव । शुद्धे[5] वर्तमाने वर्तमा-[प० १२-२]नैवेत्यर्थः । संप्रति वर्तमानैवेत्यनेन । वर्तमान-भविष्यतोस्तु यत्र प्रतीतिस्तत्र सप्तम्यादयः । तत्र वर्तमाने तावद्यथा—'भोजन कर, भुञ्ज'—अत्रार्थे भुङ्क्ते । 'पाक कर, अप' (?पच)—पचति । 'गमन कर, या'—गच्छति । 'स्थान कर, आछ'—तिष्ठति । 'शयन कर, सोअ'—शेते । 'दर्शन कर, देख'—पश्यति । 'श्रवण कर, सुण'—शृणोति । 'घ्राण

1 विशन् । 2 °कारणी न । 3 °क्रियास्तु । 4 एसु च । 5 सुद्धे ।

कर, छुंघ'—सिंहु(शिंघ॰)ति। 'आलिंगन कर, आलिंग'—आलिङ्गति। 'आस्वादन कर, आस्वाद'—आस्वादयति। 'ग्रहण कर, ले'—गृह्णाति। 'त्याग कर, छाड'—त्यजति। एवमन्येऽपि वर्तमानोक्तौ प्रयोगा द्रष्टव्याः॥ छ॥

'ह्यस्तन्यद्यतनीवा' इति। यत्र तु 'किएसि' इत्युक्तिस्तत्रातीतः कालः। तत्र च ह्यस्तनी-अद्यतनी-परोक्षा-क्रियातिपत्तयश्चतस्रोऽपि प्रयोज्याः। 'स्मेनातीते' इत्यधिकारे 'परोक्षा'; 5 'भूतकरणवत्यश्च'। इत्येताभ्यामित्यर्थः। तद्यथा—'पाक किएसि, पएसि'—अत्रार्थे—अपचत्, अपाक्षीत्, पपाच, अपक्ष्यत्—इत्येषामेकः प्रयोज्यः। 'भवन किएसि, भा'—अभवत्, अभूत्, बभूव, अभविष्यत्—इत्येषामेकः प्रयोज्यः। 'भोजन किएसि, जेंवेसि' [प॰ ११-१] अभुङ्क्त, अभुक्त, बुभुजे, अभोक्ष्यत्—इत्येषामेकः प्रयोज्यः। 'किएसि'—अकरोत्, अकार्षीत्, चकार, अकरिष्यत्। 'दर्शन किएसि, दीवेसि'—अपश्यत्, अद्राक्षीत्, ददर्श, 10 अद्रक्ष्यत्। 'नअन किएसि, निएसि'—अनयत्, अनैषीत्, निनाय, अनेष्यत्। एवमन्येऽप्यतीतोक्तिव्यापाराः प्रयोज्याः॥ छ॥

'जइ पावंत तव करत' इति। 'किएसि' इति योक्तिः सा क्रियातिपत्तेर्ह्यस्तन्यादिसाधारणा। 'जइ पावंत तव करत' इति च क्रियातिपत्तेर्विशेषोक्तिः। तत्र च 'यद्यप्राप्स्यत् तदा अ[क]रिष्यत्' इति प्रयोगः। 'जइ देउ वृष्टि करत तव अन्न होंते(॰त?)'—यदि देवो वृष्टिमकरि- 15 ष्यत्, तदान्नमभविष्यत्। 'जइ इंधण पाएंत तव ओंदन पएंत'—एधांश्चेदलप्स्यदोदनमपक्ष्यत्। एवमन्येऽपि क्रियातिपत्तिप्रयोगाः कार्याः।

'करिह इति' इति। यत्र 'करिह' इत्युक्तिस्तत्र भविष्यत्कालः। तत्र च भविष्यन्ती-श्वस्तन्यौ आशीश्च। 'भविष्यति भविष्यन्त्याशीः श्वस्तन्यः' इत्यनेन आशीर्युक्तेन भविष्यति, आशिष एव पञ्चम्या वा प्रयोगः। तद्यथा—'देवदत्त कट करिह'—[प॰ १३-२] देवदत्तः कटं करिष्यति, 20 कर्ता वा, क्रियाद् वा। एवं 'भोजन करिह, जेंविह'—भोक्ष्यते, भोक्ता वा, भोक्षीष्ट वा। 'पाक करिह, पैह'—पक्ष्यति, पक्ता वा, पच्याद् वा। 'जाग करिह, यजिह'—यक्ष्यति, यष्टा वा, इज्याद् वा। 'त्याग करिह, तजिह'—त्यक्ष्यति, त्यक्ता वा, त्यज्याद् वा। एवमन्येऽपि भविष्यदुक्तौ प्रयोगाः कार्याः॥ छ॥

'आशिषि च पञ्चमी स्यात्' इति। इष्टार्थस्य लाभे वाञ्छि: (?) करणमाशीः, अङ्गीकारे, 25 समर्थनायाम्, कर्तुमिच्छतोऽनुज्ञाऽनुमतिः, एतेषु पञ्चमी स्यात्। यथा—'बहु देवस जीवउ देवदत्त'—बहून् दिवसानजीवत् देवदत्तः, जीव्याद् वा। 'धन पुत्र सपुन होउ'—धनैः पुत्रैश्च संपूर्णो भवतु, भूयाद् वा। *। अङ्गीकारे यथा—'हउं सहसौ जिणउं'—अहं सहस्रमपि जयानि। जि जये। 'हउं पर्व्वत उ टालउं'—अहं पर्वतमपि टालयामि। टल ट्वल वैकल्ये। *। अनुमतौ यथा—'सवहिं भूतं दया करु'—सर्वेषु भूतेषु दयां कुरु। 30 'पराइं वथुं जीव छाडु'—परकीये वस्तुनि त्रि(तृ॰)ष्णां छिन्धि। 'कोवु छाडि क्षमा भजु' कोपं त्यक्त्वा क्षमां भज। इत्यादयः पञ्चमीप्रयोगविषया ज्ञेयाः॥ छ॥

'करउ' [प० १४-१] इति सप्तमी स्यात् पञ्चम्यथवा' इति। 'करउ' इति विध्यर्थः। यतः अज्ञातज्ञापनं विधिः। तत्र सप्तमी-पञ्चम्यौ प्रयोज्ये । 'विध्यादिषु सप्तमी च' इत्यनेने-त्यर्थः। तद्यथा – 'धर्म्मु करउ' – धर्म्मं कुर्यात्, करोतु वा। 'संसारु अनित्यु देखउ' – संसार-मनित्यं पश्येत्, पश्यतु वा। 'सवहि उपकारिआ होउ' – सर्वेषामुपकारी भूयात्, भवतु वा। ५ एवमन्येऽपि ॥ छ ॥

'तथैव मायोगे ह्यस्तन्यद्यतनी वा' इति। मा स्म योगे वा (!) 'मायोगेऽद्यतनी'; 'मास्मयोगे ह्यस्तनी च' इत्येताभ्यामित्यर्थः। यथा – 'जणे हो सो भाजया जुनु याथि' – मा ह (?भ०)वत् सा भार्या यस्याः पुत्रो नास्ति, मा भूद् वा । 'सो पूतै जणिं जाम जो निर्गुणु हो' – स पुत्र एव मा जायत, मा स्म जनिष्व वा, यो निर्गुणो भवति। 'ते गुणै जणिं उपजति १० जे सवहि न उपकरति' – ते गुणा एव मोत्पद्यन्त, मा स्म वा, ये सर्वस्य नोपकुर्वन्ति । 'पपु जणि करसि' – प(? पा०)पं मा करोः, मा स्म कार्षीर्वा। 'सन्त मार्ग्गु जणि छाटसि' – सन्तं मार्ग्गं मा त्यजः, मा स्म त्याक्षीर्वा। एवमन्येऽपि ॥ छ ॥

'स्मेनातीतेऽपि चाद्या स्यात्' इति। आद्या=वर्तमाना। न केवलं[प० १४-२]–वर्त्तमाने, अतीतेऽपि। किन्तु स्मेन स्म-शब्देनाऽव्ययेन योगे। यथा – 'बहुतु राजा एथुं भुइं भय' – बहवो १५ राजानो अत्र भूमौ भवन्ति स्म, बभूवुर्वा। 'तेहू(ह्न० ?) करिं सभां बहुतु पु(गु०)णिआ भए सुंवति' – तेषां कृतासु सभासु, तदीयासु वा, बहवो गुणिनो भूता[:] श्रूयन्ते स्म, शुश्रुविरे वा। 'तेहु मारा (०झ ?) कालिदास माघ किरात प्रभृति केतौ एक स्वातिं गए' – तेषां मध्ये कालि-दास-माघ-किरातप्रभृतयः कियन्त एके ख्यातिं गच्छन्ति स्म, जग्मुर्वा। एवमन्येऽपि ॥ छ ॥

एतच्च त्यादिविभक्तीनां प्रयोगेषु दिङ्मात्रं दर्शितं ग्रन्थविस्तरभयात् । अनेनैव क्रमेण २० ज्ञातत्यादिभिः प्रथम-मध्यम-उत्तमपुरुषेषु, एकवचन-द्विवचन-बहुवचनेषु कर्तृ-कर्म-भावोक्तिषु कालत्रयेऽपि प्रयोगा ऊह्या इति ॥ छ ॥

अथ कार्त्तानामुक्तिभेदं दर्शयितुं आर्याचतुष्कमाह –

अथ शन्तृङानशाविह विज्ञेयौ 'करत आछ' इत्युक्तौ । [प० १५-१]
'करि आछ' इति क्त्वा, णम् 'करि करि आछ' प्रयोज्यः स्यात् ॥१४
२५ **'करवें आछ' तुम् भवेत्, यदि वाऽयं 'करण या' इतीहोक्तौ ।**
शेषास्त्वनुदितभेदाः 'कर' इत्युक्तौ वुणाद्या ये ॥ १५ ॥
निष्ठा-क्वन्सुप्रमुखा अतीतकालोदितास्तु ये कार्त्ताः ।
तेषामुक्तिः 'किएसी' त्येषैव हि सर्व्वदा ज्ञेया ॥ १६ ॥

शत्राणौ(°नौ) तु स्य-युतौ विज्ञेयौ 'करणिहार आछे'ति।
व्यापारोक्तेरन्ते वध्येत् कृत्यास्तदा[1] योज्याः॥ १७॥

'अथ शन्तृकानशाविह' इति। यथा – 'धर्मु करत आछ' – धर्मं कुर्वन्नास्ते, स्त्री तु कुर्वन्ती, कुलं[2] तु कुर्वत्। 'आनोऽत्रात्मने' – तेनात्मनेपदविषय एव। धर्मं कुर्वाण आस्ते, कुर्वाणा वा, कुर्वाणं वा। 'न निष्ठादिषु' इति षष्ठीनिषेधः। एवं 'पठन[3] करत आछ, पढत आछ' – पठन्नास्ते, पठन्ती वा, पठद् वा। 'गमन करत आछ, यान्त आछ' – गच्छन्नास्ते, गच्छन्ती वा, गच्छद् वा। यान् वा, यान्ती वा, याद् वा। 'भोजन करत आछ, जेंवत आछ' – भुञ्जान आस्ते, भुञ्जाना वा, भुञ्जानं वा। [पृ० १५-२] घिवि जिवि प्रीणनार्थौ इत्यनेन तु जिम्वन्नास्ते, जिम्वन्ती वा, जिम्वद् वा। एवमन्येऽपि॥ छ॥

'करि आछ इति क्त्वा' इति। 'एककर्तृकयोः पूर्वकाले' इति। पूर्वापरकालोपलक्षणमेतत्। तत्र यथा – 'धर्मु करि आछ' – धर्म्मं कृत्वा आस्ते। 'न्हाइ देउ पूजि, बम्हणह्(°न्हु?) दानु देइ, जेंव' – स्नात्वा, देवं पूजयित्वा, ब्राह्मणेभ्यो दानं दत्त्वा जिम्वति, भुङ्क्ते वा, भुक्तवान् वा, भो(भु°?)ज्यते[4] वा। 'पढि पांडे भा' – पठित्वा पण्डितो भूतः, अधीत्य वा। 'ओलगि सुखि आहोन्त आछ' – अवलग्य सुखी भवन्नास्ते, भविष्यति वा, भूतो वेति। एवमन्येऽपि॥ छ॥

'णम्, 'करि करि आछ' प्रयोज्यः स्यात्'। 'णम्' प्रत्ययः पुनः क्त्वार्थ एव प्रयुज्यते; परमाभीक्ष्ण्ये। 'णम् चाभीक्ष्ण्ये द्विश्च पदम्' इति वचनात्। यथा – 'करि करि आछ' – कारं कारमास्ते, कृत्वा [5]कृत्वेत्यर्थः। 'भुंजि भुंजि या' – भोजं भोजं व्रजति, याति वा। 'देखि देखि[6] तूस' – दर्शं दर्शं तुष्यति। 'लै लै पला' – आदायमादायं पलायते। 'मारि मारि खा' – मारं मारं खादति। 'सोंअरि सोंअरि रोवा' – स्मारं स्मारं रोदति। एवमन्येऽपि॥ छ॥

'करवें आछ' तुम् भवेत्। 'वुण्-तुमौ क्रियायां क्रियार्थायाम्'। [पृ० १६-१] तद्यथा – 'धर्मु करवें किंह(°न्ह?) आछ' – धर्म्मं कर्तुमास्ते। 'पढवें किंह आछ' – पठितुमास्ते। 'गाँउं जावें किंह संजव' – ग्रामं गन्तुं संयमयति। यमच परिवेषणे॥ छ॥

'यदि वा' इति। अयं तुम्। यथा – 'करण या' – कर्तुं याति। 'पढण आव' – पठितुमागच्छति। आयाति वा। वा गति-गन्धनयोः। 'जेंवण दे' – जिम्वितुं ददाति, भोक्तुं वा। एवमन्येऽपि॥ छ॥

'शेषास्त्वनुदित' इति। अनुदितभेदा अप्रसिद्धोक्तिविशेषा ये केचन कथितेभ्यः अवशिष्टाः सन्ति ते **'कर इत्युक्तौ'** = वर्त्तमानोक्तावित्यर्थः, प्रयोज्या इति शेषः। ते च वुणाद्याः = वुण्-तृजादयः। 'पाक कर' – पाकं करोति, पाकस्य कर्त्ता वा, पाकस्य करो वा। एवं 'देवता

1 कार्या सदा। 2 कुर्वं। 3 पठन°। 4 भोज्यते। 5 कृत्वे°। 6 देखि देखि तूस।

दर्शन कर, देउ देख' — देवस्य द्रष्टा वा दर्शको वा। 'ग्राम गमन कर, गाउं जा' — ग्रामस्य गन्ता, गमको वा; याता वा। एवमन्येऽपि यथादर्शनं प्रयोज्याः ॥ छ ॥

'निष्ठा-क्वस्नुप्रमुखा' इति। क्तवत्त्वादिवदित्यर्थः। तद्यथा — 'भातु भोजनु किएसि, जेंवेसि' — भक्तं भुक्तः, भुक्तवान् वा, बुभुजानो वा; ओदनं वा। स्त्री तु भुक्ता, भुक्तवती। बुभुजाना[1] वा। 'शास्त्रु किएसि' — शास्त्रं कृतः[2], कृतवान्, चकृवान्। [प० १६-२] चक्राणो वा। स्त्री तु कृता[3], कृतवती, चकुषी, चक्राणा वा। 'कलाव ला(जा०?)णेसि' — कलापं वित्तः, विद्वान् वा; स्त्री तु वित्ता, विदुषी वा। कुलं तु वित्तं, विद्वद् वा। एवमन्येपि ॥ छ ॥

'शत्राणौ(नौ) तु स्य-युतौ' इति। 'शत्राणौ(नौ) स्य-संहितौ शेषे च' इत्यनेनेत्यर्थः। तद्यथा — 'धर्मु करणिहार आछ' — धर्मं करिष्यन्नास्ते, स्त्री करिष्यन्ती, कुलं करिष्यत्। एवं 'पढणिहार आछ' — पठिष्यन्नास्ते, पठिष्यन्ती वा, पठिष्यद् वा। एवं 'जणिहार दीस' — गमिष्यन् दृश्यते, गमिष्यन्ती वा, गमिष्यद् वा। 'जेंवणिहार आछ' — जिम्विष्यन्नास्ते; भोक्ष्यमाणो[4] वा; स्त्री तु भोक्ष्यमाणा वा, कुलं भोक्ष्यमाणम्। एवमन्येऽपि ॥ छ ॥

'व्यापारोक्तेः' इति। वश्चेद् = वकारश्चेत् प्रयुक्तः, अपभ्रंशे दृश्यत इत्यर्थः। कृत्याः 'ते कृत्याः' इति कृत्यसंज्ञा ये तव्य-अनीय-क्यप्-ध्यण्-या इत्यर्थः। तद्यथा — 'वेद पढव' — वेदः पठितव्यः, पठनीयः। 'स्मृति अभ्यसवि' — स्मृतिरभ्यसितव्या,[5] अभ्यसनीया। 'पुराण देखव' — पुराणं द्रष्टव्यम्, दर्शनीयम्, दृश्यं वा। 'धर्मु करव' — धर्मः कर्तव्यः, करणीयः, कार्यः, कृत्यो वा। एवमन्येऽपि ॥ छ ॥

ननु कर किएसि करिह इति करोतिनोक्तयो निबद्धाः। अतः [प० १७-१] अपरधातुष्वितषु तर्हि कः प्रयोगप्रकार इत्याशङ्क्याह —

इत्युक्तयो मयोक्ताः करोतिना सर्वधातुविषयत्वात्।
तस्मादमुनैव पथा[6] शेषार्था धातवश्चोह्याः ॥ १८ ॥

करोतिर्हि सर्वधातुविषयः, अतः 'करोतिना' दर्शिता उक्तयः सर्वधातुभिरपि ज्ञेयाः। करोत्यर्थस्य सर्वव्यापकत्वात्। तथैव च प्रत्येकमुदाहरणेषु दर्शितमेव। 'तस्माद्' इति। दिङ्मात्रमेवैतद्दर्शितम्। अनेनैव च मार्गेण ये अवशिष्टप्रत्ययानां धातूनां चार्थास्तेऽप्यूह्याः — स्वबुद्ध्योद्भाव्य प्रयोज्या इत्यर्थः। तद्यथा — 'करण चाह' — कर्तुमिच्छति चिकीर्षति। 'करण इच्छत आछ' — कर्तुमिच्छन्नास्ते। 'धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्' इति सन्। 'सुठु हो(सु होउ?)' — सो भूयते। लुकि बोभूति। 'धातोर्यैकशब्दश्चेकीयितं क्रियासमभिहारे।'

1 भुभुजान वा। 2 क्रितः। 3 किता। 4 भोष्यमाणा। 5 °रभ्यसताव्या। 6 अथा।

'पुत्र इच्छ' – पुत्रमिच्छति = पुत्रीयति, पुत्रकाम्यति । 'नाम्न आत्मेच्छायां क्यिन्'; 'काम्य च' । एवमन्येऽपि ॥ छ ॥

॥ इत्युक्तिव्यक्तिविवृतौ क्रियोक्ति[व्यक्ति]व्याख्या ॥

ॐ

अथ कारकोक्तिव्यक्तिर्व्याख्यायते । तत्र कारकाणां साधारणं लक्षणमाह –

तस्य निमित्तं यत् पुनरुक्तौ तत् कारकं हि लिङ्गोक्तम् ।
व्यापारभेद[1][प० १७-२]भिन्नं ज्ञात्वा तज्ज्ञैः प्रयोज्यं स्यात् ॥ १९ ॥

तच्छब्दः पूर्वोक्तपरामर्शी । पूर्वं च 'व्यापारो धात्वर्थः' (का० ८) इत्युक्तम् । अतस्तस्य = व्यापारस्य निमित्तं = निष्पत्तौ कारणं यत्, उक्तौ = अपभ्रंशभाषिते । तत् कारकं ज्ञेयम् । हि यस्मात् । क्रियानिमित्तं कारकमुच्यते । तच्च लिङ्गोक्तम् । 'धातुविभक्तिवर्ज्जमर्थवल्लिङ्गम्' । तेनोक्तम्, वृक्षादिशब्दवाच्यमित्यर्थः । क्रियाकारकसमुदायो वाच्य(क्य?)म् । तत्र च क्रिया धातुप्रयोज्या । कारकं तु लिङ्गप्रयोज्यमिति भावः । ननु षट् कारकाणि । ततश्चानेककारके प्रयोगे कुत्र कतमत् प्रयोज्यमित्याह – व्यापारभेदभिन्नमिति । कारकाणि किल क्रियायां स्वस्वव्यापारेण व्याप्रियन्ते । ते च व्यापारास्तेषां भिन्नाः, तद्भेदाच्च कारकाणां भेदः । लोहकार-चर्म्मकारादीनामिव । ततश्च स्वस्वव्यापारेण चिह्नितं ज्ञात्वा कर्त्रादिकं परिच्छिद्य, तज्ज्ञैः = विदितकारकसङ्केतैः, प्रयोज्यं स्यात् = संस्कृतभाषया वाच्यं भवेत् ॥ छ ॥

अथ व्यापारभेदं कथयन्कर्तुस्तावदाह –

यः कारकः स कर्त्ता प्रेर्यश्चेत् प्रेरकस्य हेतुत्वम् ।
तत्रेनन्तो धातुः संबोध्यः संमुखीकरणे ॥ २० ॥

लोकोक्तिप्रयुक्तानेक[प० १८-१]कारकमध्ये यः कारकः = क्रियां 'यः करोति स कर्ता' । बहुषु व्याप्रियमाणेषु यदुद्देशेन लोकैरयमेतत् करोति इति निर्द्दिश्यते स कर्तृवाच्य इत्यर्थः । यथा 'काठह्न स्थालिं ओदन सुआर पच' – काष्ठैः स्थाल्यामोदनं सूपकारः पचति – इत्यत्र सूपकारः । 'खेतं हंसिएं व्रीहिं लविर्ति कमारें' – क्षेत्रे दात्रेण व्रीहयो लूयन्ते कर्मकरेण' इत्यत्र कर्मकरः । इत्यादि । 'प्रेर्यश्चेत्' इति । स च कर्ता द्विविधः स्वतन्त्रः, परतन्त्रश्च । स्वतन्त्रो दर्शितः । यस्तु कर्त्ता[2] अन्येन प्रेर्यते स प्रेर्यो भवति । यदि च प्रेर्यः, तदा तस्य यः प्रेरकस्तस्य हेतुत्वं भवति । 'कारयति यः स हेतुश्च' इति वचनात् । यत्र च हेतुकर्तुः प्रयोगस्तत्र वाच्ये धातुरिनन्तः प्रयुज्यते । 'धातोश्च हेतौ' इत्युक्त इन्-प्रत्ययोऽन्ते यस्य । यथा – 'दुहाव गाइ दूधु गुआलें गोसांवि' – दोहयति गां दुग्धं गोपालेन गोस्वामी । अत्र गोपालः प्रेर्यः । गोस्वामी हेतुकर्त्ता । 'पढाव छात्रहि शास्त्र ओझा' – पाठयति छात्रं

1 भेदे । 2 कर्ता ।

शास्त्रं उपाध्यायः। अत्र च छात्रः प्रेर्यः, उपाध्यायो हेतुकर्त्ता। एवमन्यत्रापि। 'संबोध्य' इति। स च कर्त्ता संबोध्यः=संबोधनीयो भव [प० १८-२] स्यामन्त्रणविषयो भवतीत्यर्थः। क? 'संमुखीकरणे'=असंमुखः संमुखः क्रियते संमुखीकरणम्, तत्र। असंमुखं कार्यान्तरासक्तं कंचिद् यदा कश्चित् संमुखं सावधानं कर्तुमिच्छति तदा तमामन्त्रयते यथा–'हे गोपाल! ⁵गां दुग्धं दुग्धि; हे छात्र! शास्त्रं पठ'–इत्यादि। कर्त्तेति च लिङ्गार्थोपलक्षणम्। यदुक्तम्–'सिद्धस्याभिमुख्यकरणमामन्त्रणम्' इति॥ छ॥

अथ कर्मादिलक्षणमाह–

कर्म्म व्यापारफलम्, येनैतत् साध्यतेऽत्र तत् करणम्।
यस्मात् तदपादानम्, यस्मै तत् संप्रदानं च॥ २१॥

¹⁰ व्यापारस्य यत् फलम्–यदुद्देशेन प्रेक्षावान् क्रियामारभते तत् कर्म। यथौदनं पचति सूपकार इत्यत्रौदनमिति। घटं करोति कुलाल इत्यत्र घटमिति। 'येनैतत् साध्यत' इति। एतत् कर्म येनोपादानेन कृत्वा साध्यते–कर्त्रा साधकतमत्वेन यद् विवक्ष्यते तत् करणम्। यथेन्धनेन पचति सूपकार इत्यत्रेन्धनेनेति। दात्रेण लुनाति कृषाण इत्यत्र दात्रेणेति। 'यस्मात् तदपादानम्' इति। यतः पृथग् भवति, यतो बिभेति वा यतो गृह्णाति वा तद-¹⁵पादानम्। विश्लेषेऽवधिरपादानमित्यर्थः। यथा [प० १९-१] 'गांव हुंत आव'–ग्रामादागच्छति। 'बाघतौ डरा'–व्याघ्राद् दरति। 'ओझा पास वीदा ले'–उपाध्यायादधीते। एवमन्यत्रापि। 'यस्मै तत् संप्रदानं च' इति। यस्मै दातुमिच्छा भवति, यस्मै प्रीणनं करोति, यस्मै किमपि धारयते तत् संप्रदानम्। यदर्थं क्रियाफलं तदित्यर्थः। यथा–'बाम्हण गावि दे'–ब्राह्मणाय गां ददाति। 'ब्राह्मणहि लाडु प्रीति जण'–ब्राह्मणाय रोचते ²⁰मोदकः। 'वणिएं कर धणु धर'–वणिजे धनं धारयते। एवमन्यत्रापि॥ छ॥

अथाधिकरणस्य लक्षणं कारकाणां लोकोक्तीश्चाह–

अधिकरणं त्वाधारोऽथैषामुक्तिः पृथग् यथा लोके।
जातौ, जेथु किंह, जाहां, जेइं करि, जो किछु कीज, जेंइं केहुं॥

कर्तृ-कर्मगता क्रिया यदाश्रिता स आधारः, तदेवाधिकरणमिति। यथा–'सिंहासण ²⁵आछ राजा'–सिंहासने तिष्ठति राजा। स्थाल्यां पच्यत ओदन इति। एवमन्यत्रापि। 'अथैषाम्' इति। अथेदानीम्, एषां कारकाणामुक्तिरपभ्रंशे प्रयोगः। लोकव्यवहारे प्रत्येकं यथा। 'जातौ' इति। यतः-तौ इति शब्दस्तदपा[दा]नं लोके। यथा–'तुम्हतौ [प० १९-२] अम्हे'–युष्मत्तो वयम्। 'अम्हतौ तुम्हे'–अस्मत्तो यूयम्। 'तातौ अम्हे ईहां आछ'–ततो वयमिहास्महे। 'अम्हतौ सौ वाढा'–अस्मत्तः स ववृधे। तथा–'ताहांहुंत आ'–तत ³⁰आगतः। 'ईहांहुंत गा'–इतो गतः–इत्यादि। 'जेथु किंह' इति। 'जेथु किंह, जा किंह,

जाहे किंह' – इत्याद्युक्तिः संप्रदानस्य, यस्मै कृते इत्यर्थे। तथा 'का किंह, क करैं' [कस्य?] अर्थे। 'कवणे काजें गा' इत्युक्तौ कस्मै गत इत्यादि संप्रदानम् । 'जाहां' इति । 'जाहां बैस ताहां दीस' – यत्रोपविशति तत्र दृश्यते । 'जाहां आछ, ताहां वांछ' – यत्रास्ते तत्र वाञ्छति । एवमधिकरणोक्तिः । 'जेहं करि' इति । येन कृत्वेति[1] । 'इंधणे रांध, हंसिएं लव' – इन्धनेन राध्यति, दात्रेण लुनाति – इति करणोक्तिः। 'जो किछु कीज' इति । यत् किञ्चित् क्रियते । यदर्था क्रिया इत्यर्थः । यथा 'भातु रान्धा' – भक्तं राध्यते । 'पोलि पाच' – पोलिका पच्यते । एवं कर्मोक्तिः । 'जेंइं केहुं' इति । येन केनापि क्रियते, यः कश्चित् क्रियायां प्रेक्षा-पूर्वकारी प्रवर्त्तते, एतैः सहेत्यर्थः । एतेन कुतोऽपि, कस्मैचिदपि, कस्मिन्नपि, केनापि, किमपि, कश्चिदपि करोतीति कारकाणां व्यापारभेदो लोकोक्त्या [प० २०-१] प्रतिपादितो भवति । तद् यथा – 'भूषहितौ ब्राह्मणु किंह थालिं करि'; एवं 'इंधणे भातु रान्ध ब्राह्मणु' – बुभुक्षात आत्मने स्थाल्यामिन्धनेन भक्तं राध्यति ब्राह्मणः । एवमन्येऽपि ॥ छ ॥

अथ लिङ्ग-संख्यादीनां कारकधर्माणां संबन्ध-विशेषणयोश्चोक्तिव्यक्तिं कुर्वन्नार्या-द्वयमाह –

> पुं-स्त्री-नपुंसकत्वं शब्दानां लोकतः परिच्छेद्यम् ।
> एकत्व-द्वित्व-बहुताः संख्यास्त्विह संख्यया ज्ञेयाः ॥ २३ ॥
> स त्वमहं[2] वा पुरुषा उक्तानुक्तत्वमुक्तितो व्यक्तम् ।
> संबन्धः स्वीकाराद् विशेषणं तु व्यवच्छेदात् ॥ २४ ॥

'पुं-स्त्री' इति । अपभ्रंशे ये शब्दाः प्रयुज्यन्ते तेषां पुं-स्त्री-नपुंसकत्वम्, लोकतो = लोको-क्तितः, परिच्छेद्यं = निश्चेतव्यम् । यथा 'मणुसु जेंम' – मानुषो जिम्वति, भुङ्क्ते वा । 'मेहलि सोअ' – महेला[3] स्वपिति । 'नपुंसक जाम' – नपुंसकं जायते । 'एक पुरुष' – एकः पुरुषः । 'दुइ जोईं' – द्वे जु(यु)वत्यौ । 'बहुतु वृन्द' – बहूनि वृन्दानि । अथवा लोकतस्तज्ज्ञलोकेभ्यः, लिङ्गस्य लोकाश्रयत्वात् । यस्य शब्दस्योक्तितो लिङ्गनिश्चयो न भवति तस्य, तज्ज्ञं लोकं पृष्ट्वा कार्य इत्यर्थः । उक्तिमात्रादेव तस्यासिद्धेः । तद्यथा – 'जालें [प० २०-२] डाह' – ज्वालेन ज्वालया वा दह्यते । 'विमाण आव' – विमानं विमानो वा आगच्छति । 'सरदं ऋतुं तड सु सोह नदीकर' – शरदि ऋतौ नद्यास्तटः तटं वा तटी वा सुष्ठु शोभते । एवमन्येऽपि ॥ छ ॥

'संख्यास्त्विह' इति[4] । इहापभ्रंशे संख्या[5] एकादिकाः । संख्ययैवोत्कीर्तितया ज्ञेया[ः], न पुनरुपायान्तरेणेत्यर्थः । द्वित्व-बहुत्वयोस्तुल्योक्तिकत्वात् । तद्यथा – 'एक जा' – एको याति, एका वा याति, एकं वा । 'दुइ अच्छति' द्वौ तिष्ठतः, द्वे वा तिष्ठतः, द्वे वा । 'बहुतु पूत भए' – बहवः पुत्रा बभूवुः । 'दुई बेटीं भईं' – द्वे बेट्टिके बभूवतुः । 'एक गदिआण पावेसि' –

---

1 क्रियेति । 2 सतत्मई । 3 मेहल । 4 संख्यास्तिह° । 5 संख्या ।

एकं गड्डिकानाणकं भास्वान्। 'दुइ गदिआणे, बहुतु गदिआणे'—द्वे बहूनीति। एव-मन्यत्रापि ॥ छ ॥

'स त्वमहं वा पुरुषाः'। पुरुषपरिच्छेद उक्तेरेव स्पष्ट इत्यर्थः। तद्यथा—'सो कर' इत्युक्तिर्लिङ्गत्रयेऽपि तुल्यैव। एवं द्वित्वादिष्वपि। तेन स करोति, सा करोति, तत् करोति। 'ते दुइ करति'—तौ द्वौ, ते वा, ते वा कुरुतः। 'ते बहुतु करति'—ते बहवः, ता बह्वयः तानि बहूनि। एवं 'तुं करसि'—त्वं करोषि; 'तुम्हे दुइ करहु'—युवां कुरुथः; 'तुम्हे बहुतु करहु'—यूयं बहवः [प० २१-१] कुरुथ। पुरुषाः, स्त्रियः, कुलानि वा। एवं, 'हौं करओं (उं ?)'—अहं करोमि। 'अम्हे दुइ करहु'—आवां कुर्व्वः। 'अम्हे बहुतु करहु'—वयं बहवः कुर्म्मः। लिङ्गत्रयेऽपि तुल्यमतस्तत्परिच्छेदस्तद्विशेषोक्तेरेवेति ॥ छ ॥

'उक्तानुक्तत्वम्' इति। द्वितीयादिविभक्तिप्रतिपाद्यं यत् कारकं तदनुक्तम्। कारकवि-हितत्यादिप्रत्ययादिप्रतिपाद्यं क्रियासंबद्धलिङ्गार्थप्रतिपाद्यं चोक्तम्। ते च द्वे अपि तु उक्तित एव—अपभ्रंशभाषितादेव व्यक्ते = स्पष्टे प्रतीयेते। तद्यथा—'छात्रु गाउं या'—छात्रो ग्रामं गच्छति। अत्र हि कर्म्मत्वं द्वितीयया व्यज्यते, अतो अनुक्तम्। उक्तं कर्तृत्वं ति-प्रत्ययेन गमनसंबद्धेन लिङ्गार्थेन वा, अत उक्तम्। 'छात्रें गाउं जाइआ'—छात्रेण ग्रामो गम्यते। अत्र तु कर्तृत्वं तृतीयया प्रतिपाद्यते, अतोऽनुक्तम्। कर्मत्वं तु ते-प्रत्ययेन गतिसंबन्धेन लिङ्गा-र्थेन च, इत्यत उक्तम्। छात्रेण गम्यते, छात्रेण भूयत इत्यादि तु भावोक्तिः। अत्र च कर्तैवानुक्त इति। एवमन्यत्रापि ॥ छ ॥

'संबन्धः स्वीकारात्'। स्वमात्मीयमुच्यते। अ-स्वं स्वं क्रियते-स्वीकारः। लोकोक्तौ स्वीकारात् संबन्धो व्यज्यते। यथा—'राजाकर पुरुषु'—राज्ञः पुरुषः। तेहूं दूकर [प० २१-२] गाउं'—तयोर्द्वयोर्ग्रामः। 'अम्हार वनु'—अस्माकं वनमित्यादि ॥ छ ॥

'विशेषणं तु व्यवच्छेदात्' इति। इतरसत्तानिवृत्तिहेतुर्विशेषणमुच्यते। तत्र लोकोक्तौ कुतोऽवगन्तव्यमित्याह—'व्यवच्छेदात्'। तद्यथा—'सुकिलि गाइ लउडें हाकु'—गामभ्याज शुक्लां दण्डेन। रक्तादीनां व्यवच्छेदः। 'बम्हण इं पर निवंतेसु'—ब्राह्मणानेव परं निमन्त्रयिष्यसि। क्षत्रियादिपरिच्छेदः। 'पढेसु पर'—पठिष्यसि परम्। [1]क्रियान्तरव्यव-च्छेदः। 'सोनें इं पर दे'—सुवर्णमेव परं ददाति। द्रव्यान्तरव्यवच्छेदः। परमार्थतस्तु सर्वाण्येव वाच्यानि व्यवच्छेदफलानि। केवलं विवक्षापेक्षा तत्प्रतीतिरतो न प्रकथ्यते। अर्थात् सिद्धार्था—इति।

॥ इत्युक्तिव्यक्तिविवृतौ कारकोक्तिव्यक्तिव्याख्या ॥

ॐ

---

1 क्रयांतर°।

अथोक्तिभेदव्यक्तिर्विधीयते । तत्रादावुक्तिभेदबीजमार्ययाऽऽह –

उक्तेश्च दश पदार्था उत्पत्तौ मूलमत्र शेषास्तु ।
तत्पल्लवास्तदाश्रयकृतभेदास्ते च कालाद्याः ॥ २५ ॥ [प० २२-१]

उक्तेश्चोत्पत्तौ – जन्मनि मूलं प्रधानं कारणं दशैव पदार्थाः । अत्र = लोकानां वाग्व्यवहारे । शब्दार्थो हि शब्देन प्रयुक्तेन प्रतिपाद्यते । स च दशप्रकार एव । लिङ्गार्थादिर्वक्ष्यमाणः । ये तु तदितरे, तेषामेव मूलभूतानां पदार्थानां पल्लवाः । तदाश्रयकृतभेदाः – ते च ते आश्रयाश्च । आश्रयो विषय उच्यते । कृतो[1] भेदो यैस्ते तथा । तदाश्रयेषु कृतभेदास्तदाश्रयकृतभेदाः । अथवा, त एव दश पदार्था आश्रयो विषयो येषाम्, तथा कृतो भेदो यैः । ततस्तदाश्रयाश्च ते कृतभेदाश्च तदाश्रयकृतभेदाः । तेषु दशसु पदार्थेषु ते आश्रिताः, तेषामेव पदार्थानामुत्पादितोक्तिभेदाः । उक्तिभेदहेतवस्ते धर्माः । न पुनः पृथक् प्रयोज्यमर्थान्तरमेकादशं किञ्चिदित्यर्थः । अतो दशैव पदार्था इति, नतु तदितरे । तर्हि के ते इत्याह – ते च कालाद्याः – इति । कालो लिङ्गं संख्या पुरुषा इत्यादयः ॥ छ ॥

अथ तानेव पदार्थानाह – [प० २२-२]

लिङ्गं क्रिया ततोऽपि च कारकषट्कं ततश्च संबन्धः ।
आमन्त्रणं च दशमं किन्त्वेतत् केवलं नोक्तौ ॥ २६ ॥

प्रथमं तावल्लिङ्गम् – अव्यतिरिक्तो लिङ्गार्थः । द्वितीया क्रिया – धात्वर्थः । ततः कर्तृ-कर्म-करण-संप्रदान-अपादान-अधिकरणानि षट् । ततश्च संबन्धः । एवं नव । दशमं च आमन्त्रणम् । एते च लिङ्गार्थादयो नव पदार्थाः, केवला अपि विवक्षाविषया भवन्ति, प्रयुज्यन्ते च । आमन्त्रणं तु लिङ्गार्थसंबद्धमेव परं प्रयोगं याति, न केवलम्; तस्य तदेकविषयत्वात् । आमन्त्रितो हि 'किं भणसि?' इत्यपेक्षते । तदुत्तरेण च वाक्यं समाप्यते, अतो नास्य केवलस्योक्तिः । अत उक्तम् – किन्त्वेतत् केवलं नोक्तौ – इति । अतो नवानामेव भेदा दर्शनीया इति भावः ॥ छ ॥

अथोक्तिभेदोत्पत्तिक्रमं तत्संख्यां चाह –

एषां चैकद्व्यादिक्रमेण लोकैर्विवक्षितानां स्युः ।
पञ्चशतान्युक्तीनामेकादशसंयुतान्येव ॥ २७ ॥

एषां च लिङ्गार्थादीनां पदार्थानां नवानां संबन्धपर्यन्तानां पञ्चशतान्युक्तीनां भवन्ति । कीदृशानि ? – एकादशसंयुतान्येव – नैकयाप्युक्त्या हीनानि नाप्यधिकानीत्येवार्थः । कथंभूता[प० २२-३]नाम् ? – एकद्व्यादिक्रमेण लोकैर्विवक्षितानाम् । तद्यथा – एकैकविवक्षायां नवैवोक्तयः, द्वयोर्द्वयोः षट्त्रिंशत्, त्रयाणां त्रयाणां विवक्षायां चतुरशीतिः । चतुर्णां चतुर्णां

षड्विंशत्यधिकं शतम् । एवं पञ्चानां पञ्चानामपि षड्विंशत्यधिकं शतम् । षण्णां षण्णां चतुरशीतिः । सप्तानां सप्तानां षट्त्रिंशत् । अष्टानां अष्टानां नव । नवानामपि विवक्षायामेकम् । एवं पञ्चशतान्येकादशाधिकान्युक्तीनां भवति । कथमियं संख्योत्पद्यत इति चेत्, उच्यते — नवकाद्येकान्तानेकाद्युत्तरच्छेदानङ्कानालिखेत् । ते च यथा —

९	८	७	६	५	४	३	२	१
१	२	३	४	५	६	७	८	९

ततः पूर्वेण परं हत्वा स्वच्छेदेन भजेत् । लब्धं छेदे संख्यानां पदार्थानामुक्तिभेदसंख्या भवति । तद्यथा — नवानामध एकच्छेदः । ततश्चैकैकस्य लिङ्गार्थादिपदार्थस्य विवक्षायां नवैवोक्तयः, ९; ततो नवभिरष्टकं हत्वा द्वाभ्यां विभजेल्लब्धं षट्त्रिंशत्, ३६; द्वयोर्द्वयोर्विवक्षायामुक्तिभेदाः । ततो षट्त्रिंशता सप्तकं हत्वा त्रिभिर्विवक्ष्य लब्धं चतुरशीतिः, ८४; त्रयाणां त्रयाणां विवक्षायामुक्तिभेदाः । एवमेव चतुर्णां षड्विंशं शतं, १२६; [प० २३-२]

पञ्चकादीनामपि विलोमेनैता एव संख्या । यथा पञ्चानां १२६; षण्णां ८४; सप्तानां ३६; अष्टानां ९; नवानामेकं १; सर्वेषां भेदसंख्या ५११ । अत्रार्थे सूत्रम् —

नवकाद्येकप्रान्तानङ्कानालिख्य ताडयेत् क्रमशः ।
पूर्व्वेण परं विभजेदेकाद्येकोत्तरैरङ्कैः ॥
छेदकसंख्यार्थानामुक्तिभिदस्ता भवन्ति सर्वेषाम् ।
एकद्व्याद्युक्तीनां भेदमितिः सा भवेदेवम् ॥ इति ।

उदाहरणं वक्ष्यते ॥ छ ॥

अथ 'शेषास्तु तत्पल्लवाः' (का० २५) इत्युक्तमतस्तानाह —

कालत्रयमथ च क्त्वा-तुम्-शन्तृङभीक्ष्णतादयो लिङ्गम् ।
संख्या पुरुषा उक्तानुक्तत्वे भेदहेतवस्तेषाम् ॥ २८ ॥

पूर्व्वं ये दश पदार्थाः कथितास्तेषु मध्ये क्रियायास्तावदभेदहे[त]वः के ?, ते कालत्रयं तावत् वर्त्तमानातीतानागतसंज्ञः(॰ज्ञम् ?) । एकैव क्रिया स्वपरिच्छिन्नकालत्रयसंबन्धात् त्रिधा भवति । तत्स्वरूपत्वाच्च तस्यास्तद्धर्म्मत्वमुक्तम् । यस्य हि यत्स्वरूपं स तस्य धर्म उच्यते । यथाग्नेरुष्णता । क्त्वा-तुमादयः प्रत्ययार्थाश्च क्रियोक्तिभेदहेतवः । कारकोक्तिभेदहेतवश्च । यथा — लिङ्गं तावत् पुं-स्त्री-नपुंसकाख्यम्, संख्या पुरुषा उक्तानुक्तत्वे [प्र० २४-१] च, एत एव च संबन्धस्यामन्त्रितस्य च । अत एते पल्लवा इव । यथा वृक्षस्य मूलं भवति, तदुद्भूताश्च पल्लवा वृक्षं विस्तारयन्त्येवं धात्वर्थ-लिङ्गार्थादयो मूलभूता वृक्ष पदार्थाः, तद्विस्तारकृतश्चैते धर्मा इत्यर्थः ।

नन्वेतैः कालादिभिः पञ्चैर्यावन्तो भेदा भवन्ति तत्संख्याऽपि किमिति न दर्शिता इत्याह—

एतद्भेदवशात् पुनरुक्तीनां या भिदो न ताः कथिताः ।
यस्माद्धर्म्मिणि विदिते तद्गतधर्म्माः स्वसंवेद्याः ॥ २९ ॥

यदा हि पटो जातस्तदा तद्गता ये शुक्लत्वैकत्वसूक्ष्मत्वादयो धर्म्मास्ते तत्संबन्धत्वाद् विदिता एवार्थात् । यतः संकेतादर्थाधिगतिर्धर्मविशिष्टश्च । धर्मी संकेतविषय इति भावः । यस्माद्—इति । धर्मिणि धात्वर्थलिङ्गार्थादिके विदिते सति तद्गता ये धर्म्मा अवयव-प्रायास्ते स्वसंवेद्या एव—स्वयमेवात्मानं वेदयन्ति । न हि गवि ज्ञाते खुर-ककुदादयः शाब-लेय-धावलेयत्वादयो वा धर्म्मास्तद्गता अविज्ञाता भवन्ति । धर्म्मिणो धर्माश्रयत्वात् । यस्य वस्तुनो यत्स्वरूपं स तस्य धर्म्म उच्यते यतः । तस्मात् धर्म्मनिबन्धना ये धर्म्मिणां भेदास्तेषां विशेषकथनमनुप [प० २४-२] युक्तमेवेति । तस्मान्नवानामेवोक्तिभेदा दर्श्यन्त इति भावः ।

अथोदाहरणानि । तत्र च लिङ्गार्थादीनां नवानामप्येकैकस्य, ततो द्वयोर्द्वयोः; इत्यादिक्रमेण ये भेदास्तेऽत्रोक्तिप्रत्युक्तिभ्यां विभक्ता लिखनीयाः । लोकव्यवहारस्य तदात्मकत्वात् । उक्तिर्हि प्रश्न उच्यते तदुत्तरं च प्रत्युक्तिः । प्रश्नोत्तरस्वरूपश्च लोके शब्दव्यवहारः प्रायः । यश्च प्रश्नविषयः स 'किं' शब्देन लोकैः प्रयुज्यते । अतो यत्रोक्तौ लिङ्गार्थादिषु यावन्तः 'किं' शब्दविषयाः, सा तावतामुक्तिरुच्यते । एकस्मिन् पृष्टे सत्येकस्योक्तिः, द्वयोः पृष्टयोर्द्वयो-रुक्तिः, त्रिषु त्रयाणामित्यादि यावन्नवसु पृष्टेषु नवानामिति । तत्र लिङ्ग-संख्या-पुरुषैः पञ्चैर्वि-भक्तस्य केवललिङ्गार्थस्य विवक्षायामुक्ति-प्रत्युक्त्योर्यथा—परिचितेन सहागतमपरिचितं दृष्ट्वा कश्चित् कंचित् पृच्छति—'को ए'—कोऽयम् । परिचितस्योत्तरम् [प० २५-१]—'मोर विसिठु'—मम विशिष्टः । अत्र हि प्रश्नोत्तरयोरन्यतिरिक्तो लिङ्गार्थो विषयः, अत इयं लिङ्गार्थोक्ति-रुच्यते । एवं वक्ष्यमाणोदाहरणेष्वपि ज्ञेयम् । 'को ए'—कावेतौ ?, राजपुरुषौ । 'को ए'—क एते ?, राजद्विजाः । स्त्रीविषये तु प्रश्ने यथा—'को ए'—केयम् ?, ब्राह्मणी । 'को ए दू'—के एते द्वे ?, मासोपवासिन्यौ । 'को ए जोई'—का एता युवत्यः ?, प्रोषितभर्तृकास्त्वत्सेवक-सिष्या(शिष्या° ?)नां वध्वः । नपुंसकविषये यथा—'काह ए'—किमिदम् ?, द्वीपान्तरफलम् । 'काह ए दुइ वस्तु'—के एते द्वे वस्तुनी ?, लवण-हिङ्गुनी । 'काह ए सब'—कान्येतानि सर्वाणि ?, त्वद्भार्याभरणानि । सामान्योक्तौ तु प्रश्ने—'काह ए'—किमिदम् ?, वृक्षः, कुण्डम्, कुमारीत्याद्युत्तरं भवत्येव ।

निर्धारितप्रश्ने तूक्तिर्यथा । 'तेन्ह मांझ कवण ए'—तयोस्तेषां वा मध्ये कतमोऽयम् ?, सर्वज्येष्ठः । अथवा कतमावेतौ ?, ज्येष्ठ-कनिष्ठौ । [प० २५-२] कतमे एते ?, ज्येष्ठभार्यापुत्राः । कतमेयम् ?, कनिष्ठा वधूः । कतमे एते ?, ज्येष्ठपुत्रवध्वौ । कतमा एताः ?, राज्ञो विलासि-न्यः । 'अरे जाणसि एन्ह मांझ कवण तोर भाइ'—अहो जानास्येषां मध्ये कस्तव भ्राता ?, उत्तरम्—स्वम् । पार्श्वस्थः पृच्छति—'कहुडा कवण'—कनिष्ठः कतमः ?, उत्तरम्—'हौं'—

अहम् । एवमन्या अपि लिङ्ग-संख्या-पुरुषविशिष्टस्य लिङ्गार्थस्योक्तय ऊह्याः । एवं केवल-लिङ्गार्थोक्तिः ।

अथ क्रियाया मात्रविवक्षायामुक्तयो यथा—'अहो काह ईहां कीजए'—भोः किमेतदिह क्रियते; अथवा 'व्यापरिअ'—व्याप्रियते ?, उत्तरम्—'पढिअ'—पठ्यते; अथवा 'पैअ'—पच्यते; अथवा 'खेलिअ'—खेल्यते; क्रीड्यते वा । 'काह इंहां तूं करसि'—किमत्र त्वं करोषि ?, 'पअउं'—पचामि । 'काह इंहां करहु'—किमत्र कुरुथः ? [ ] पठावः । किमत्र कुरुथ [ ] पठामः । 'काह कीजत आच्छ'—किं क्रियमाणमास्ते ?, पच्यमानम् । 'काह करत आच्छिअ'—किं कुर्वता स्थीयते, आस्यते वा, पचता । एवमादि वर्त्तमाने ॥ छ ॥ [प० २६-१]

अथातीते—'अरे एति वार तैं काह किअ तांहा'—अहो एतावतीं वेलां किमकारि तत्रैव ?, 'पढा'—अपाठि, पठितं वा; [पआ ?] अपाचि, पक्वं वा । 'काह करत आच्छे'—किं कुर्वता स्थितम् ?, 'पढत'—पठता । 'पयन्त'—पचता ।

अथैष्यति—'काह करिहसि'—किं करिष्यसि ?, 'पढिहउं'—पठिष्यामि । 'ओंलगिह-उं'—अवलगिष्यामि । 'काह करणिहार आच्छसि'—किं करिष्यंस्तिष्ठसि, किं कर्तुकामो वा ?, 'पढणिहार'—पठिष्यन्, पठितुकामो वा । 'काह करत आछीहसि'—किं कुर्व्वन् स्थास्यसि ?, 'पढत'—पठन् । 'काह करणे(णि ?)हारें आछिअ'—किं करिष्यमाणेनास्यते ?, 'पढणि-हारे'—पठिष्यमाणेन । 'काह करव'—किं करिष्यते ?, 'पढव'—पठिष्यते, वक्ष्यते वा । एवमितरधातवोऽपि यथेष्टं प्रयोज्याः । 'काह करि, काह करत आच्छसि ?, रांधि जेमत आच्छउं'—किं कृत्वा कुर्व्वन्नसि ?, राद्ध्वा पक्त्वा वा जिंवन्नसि, भुञ्जानो वा । 'काह करि काह कीज हो ?, पइ जेंविअ'—किं कृत्वा, किं क्रियते ?, पक्त्वा जिंव्यते, भुज्यते वा । 'काह इंहां कीज ?, पै पै खाज'—किमत्र [प० २६-२] क्रियते । पक्त्वा पक्त्वा खाद्यते; पाचं पाचं वा खाद्यते । 'काह ईहा कर ?, जेंवि जेंवि जा'—किमत्र करोति ?, जिम्वित्वा जिम्वित्वा याति; अथवा भोजं भोजं व्रजति । 'काह करण, किंह, काह करत आच्छसि, आछिअ वा, काह कीज वा'—किं कर्तुं, किं कुर्वंस्तिष्ठति, कुर्वता स्थीयते वा, किं क्रियते वा । 'जेंउंवे किहं राधत आच्छउं, आच्छिअ राध्न'—जिंवितुं राध्यता स्थीयते, भोक्तुं पचता वा, भोक्तुं पच्यते वा । 'काह करत, काह करसि'—किं कुर्वन्, किं करोषि ?, 'पढत रांधउं'—पठन् राध्नोमि, पचामि वा । 'काह करत, काह कीज ?, पअंत पढिअ'—किं कुर्वता, किं क्रियते ?, पचता पठ्यते । एवं युगपत्क्रियमाणयोः क्रिययोर्गौणमुख्यभावे । तं विना तु, किं किं क्रियते—'काह काह कीज ?, पइअ, पढिअ'—पच्यते पठ्यते । एतच्च दिङ्मात्रम् । एवमन्येऽपि क्रियामात्रविवक्षायां सपल्लवा उक्तय ऊह्याः । एवं केवलक्रियोक्तिः ।

अथ केवलकर्तृविवक्षायामुदाह्रियते । स च कर्ता द्विविध उदाहार्यः, उक्तश्चानुक्तश्च ।

तत्र चोक्तस्य कर्तुर्लिङ्गा[प० २७-१]र्थादयं विशेषो यदयमुक्तकर्तृशक्तिकः क्रियासंबन्धः प्रयुज्यते । लिङ्गार्थस्तु स्वरूपेणैव । 'को ए सोअ' – क एष स्वपिति शेते वा । 'को ए सोअन्त आच्छ' – क एष स्वपन्नास्ते, शयानो वा ?, उत्तरम् 'पहारी' – प्रहर[क]दाता । 'केइं ए सोविअ' – केनैतत् सुप्यते, शय्यते वा ?, 'पहारी' – प्रहरकदात्रा । 'को ए रांध' – क एष राध्यति, 'को ए रांधत आच्छ' – क एष राध्यन्नास्ते, पचन् वा ?, सूपकारः । केषा राध्यति ?, सूपकारी । किमेतत् पचति ? व्यञ्जनम् । सूपकारकुलम् । 'केइं ताहां जेंउंअ' – कस्तत्र बुभुजे, अजिवद् वा ?, सा(?) ब्राह्मणः । 'को ताहां जेंवत आछ' – कस्तत्र भुञ्जन आसीत् ?, द्विजः । 'इंहां को पढिह' – अत्र कः पठिष्यति ?, द्विजात्मजः । 'इंहा को पढणिहार आछ' – अत्र कः पठिष्यन्नास्ते ?, छात्रः । 'अम्हपास केइं पढव' – अस्मत्तः केन पठितव्यम्, अस्माकं पार्श्वे वा ?, द्विजसुतेन । एवं द्वित्व-बहुत्वयोरपि । गुरुं शिष्यः पृच्छति – 'राउळें पाहु रांध को आच्छिह' – राजकुलचरणानां संनिधौ कः स्थास्यति ?, गुरोरुत्तरम् 'तूं' – त्वम् । 'मोर क्षेम को करिह' – मम क्षेमं कः करिष्यति ?, [प० २७-२] उत्तरम् 'हौं' – अहम् । एवमन्या अपि पल्लवस्य कर्तुरुक्तय ऊह्याः । एवं केवलकर्तुरुक्तिः ।

अथ हेतुकर्तुर्विवक्षायामुदाह्रियते । 'कवण ए छाती तर्डे (?) राकर सागर ओडहूपास सणावन्त आच्छ' – क एष धृतच्छत्रो राजसागरमुद्रैः स्नानयति, स्नानयन्नास्ते ?, सूरपालो नाम राजपुरुषः । 'केइं ए देउलु कराविअ' – केनैतद् देवकुलं कार्यते ?, 'करांवित आच्छ' – कार्यमाणमास्ते ?, धनपालेन । 'केई ए ईहां बाम्हण थापे' – क इहैतान् ब्राह्मणान् स्थापयामास ?, गोविन्दचन्द्रदेवः ॥ छ ॥ 'हो इह कोउ जो कनमेरुतुलु प्रासादु कराविह' – भविष्यति कोऽपि यः कर्णमेरुतुल्यं प्रासादं कारयिष्यति ?, 'राजा जइ कोउ' – राजा यदि कश्चित् । सुपुत्रः पृच्छति – 'अहो पितरहो को तुम्ह तारिह' – अहो पितरः को युष्मांस्तारयिष्यति ?, उत्तरम् 'तुहिं' – त्वमेव । पुनः पृच्छति – 'मोंहिं तहिं के वढाविहंति' – मम तर्हि के संवर्द्धयितारः ?, उत्तरम् 'अम्हेइ' – वयमेव । एवमन्या अपि हेतुकर्तुरुक्तय ऊह्याः । एवं हेतुकर्तुरुक्तिः ।

अथ केवलकर्म्मविवक्षायामु [प० २८-१] दाह्रियते । तच्च कर्म्म द्विविधमुक्तमनुक्तं च । तत्रोक्तस्य कर्म्मणो लिङ्गार्थादयं विशेषो यदुक्तकर्मशक्तिकः क्रियासंबन्धः प्रयुज्यते, लिङ्गार्थस्त्वव्यतिरिक्तः स एव । तद्यथा – 'अहो काह ए सुआरे वेंटलि किएं रांध' – भोः किमसौ सूपकारः कृतसि(शि)रोवेष्टनो राध्यति ?, 'भातु' – भक्तम्, ओदनं वा । 'काह पचन्त आछ' – किं पचन्नास्ते ?, 'पुप' – अपूपान् । 'ए जोइ काह इंहां रांध' – इयं युवती(तिः) किमत्र राध्यति ? व्यञ्जनम् । 'ए कहार काह संपाडति' – एतौ काहारौ किमत्र संपादयतः, एते काहारा वा किमत्र संपादयन्ति ?, 'इंधणपाणि' – इन्धनोदकम् । 'काह जेंवित आच्छ' – किं भुज्यमानमास्ते ?, 'काह जेंविअ' – किं भुज्यते ?, 'घिए सांकरे सेंउं

सातु' — सघृतस(श)र्कराः सक्तवः । कृस(श)रा वा, पायसं वा । 'बेटा काहां गा' — बेटकः किं जगाम, गतवान् वा । कन्या तु गतवती । 'ओझाउलु' — उपाध्यायगृहम् । 'पडवसीकर घरु' — प्रतिवेशिनो गृहम् । भृत्यः स्वामिनं पृच्छति — 'पहरें को ईहां धरिहंति राउलु' — प्रहरके किं(कः?)मत्र नियोक्ष्यन्ति चरणाः ?, 'तोहि' — त्वामेव । 'राउलं को धरव' — चरणैः ५ को धर्तव्यः ?, 'तुहीं' — त्वमेव । [प० २८-२] 'विआलि को हउं मागिहउं' — विकालिकां कमहं याचिष्ये ?, 'अम्हे' — आ(अ)स्मानेव । 'को मै भोजन मागव' — को मया भोजनं याचितव्यः ?, 'अम्हेइ' — वयमेव । एवमन्या अपि सपल्लवस्य कर्मण उक्तय ऊह्याः । इति कर्मोक्तिः ॥ छ ॥

अथ करणविवक्षायामुक्तय उदाह्रियन्ते — 'देउ काहें धाए' — देवं केन ध्यायति ?, १० 'मने' — मनसा । 'नइ काहें पव(त?)रिसि' — नदीं केन प्रतीर्णवान् ?, 'बाहन्हे(ह्व ?)' — बाहुभ्याम् । 'छांटेहें काहें विद्या अवड' — सत्वरं कया विद्या आपद्यते ?, 'प्रज्ञै' — प्रज्ञया ।

अथवा वृत्तैरुदाह्रियते । तद्यथा —

दुर्जयो जायते वीरः केन संग्रामसंकटे ? — खड्गेन ।
सन्तरन्ति नदीं धीरा[ः] काभ्यां साहसशालिनः ? — बाहुभ्याम् ।
१५ जगत् क्षीरार्णवे मग्नमिव कैर्जायते निशि ? — शरच्चन्द्रकरैः । एवं पुंसि ॥
निकृत्तचरणस्तूर्णं पथि याति कयैकया ? — काष्ठघोटिकया ।
ग्रीष्मसंतप्तभूपृष्ठे काभ्यां संचर्यते जनैः ? — उपानद्भ्याम् ।
पर्जन्यः कुरुते विश्वं काले काभि[ः] पुनर्नवम् ? — वृष्टिभिः । एवं स्त्रियाम् ॥
कुलालैर्नीयते केन मृत्पिण्डोऽपि च पात्रताम् ? — चक्रेण ।
२० काभ्यामालोकये[त्] लोकः कार्यजातमहर्निशम् ? [प० २९-१] — नेत्राभ्याम् ।
अपि बालनृपं राज्यं वर्त्तते कैर्दृढव्रतैः ? — पात्रैः । एवं नपुंसके ॥

एता एव च क्रिया अतीतानागतयोरप्युदाहार्याः ।

सेनापतिः पतिं ब्रूते नाथ केन जयस्यरीन् ? — त्वया । एवं युष्मदि ।

पुनः पृच्छति —

२५ केनैताः संपदो नित्यं जायन्ते मे नवा नवाः ? — मया । इत्यस्मदि ।

एवमन्या अपि सपल्लवाः करणोक्तयः ऊह्याः । एवं करणोक्तिः ॥ छ ॥

अथ केवलसंप्रदानविवक्षायामुदाह्रियते । यथा — 'ए बेटी काहि देवि' — इयं कन्या कस्मै देया ?, उत्तरं श्लोकेन —

सजातीयाऽसगोत्राय योग्याय गुणिनेऽर्थिने ।
३० मातापित्रोः पञ्चसप्तशाखान्तरितजन्मने ॥

उपस्थितं महत् पर्व्व वित्तं न्यायार्जितं च मे ।
पृष्टः कस्मै ददामीति पात्रायेत्युत्तरं वदेत् ॥
यस्मै यद्रोचते विप्रास्तेन तत् कथ्यतामिह ।
इत्युक्त्वा वाञ्छितं तेभ्यो दत्तमक्षयमुच्यते ॥
यस्मै धारयते वित्तमात्तं संकल्पितं धृतम् ।
तस्मै तदखिलं दद्याद् ऋणशेषं न धारयेत् ॥
पात्रापात्रकथा देव-पितृकृत्ये विचार्यते ।
वित्ते सत्यर्थिने देयमिति मह्यं तु रोचते ॥
वृद्धौ मातापितरौ भार्यापत्यादिसन्ततिर्दासाः । [प० २९-२]
सजातिश्च दरिद्रः पोष्यास्तेभ्यः सदा देयम् ॥

ब्राह्मणेभ्योऽत्र दीयते । गम्यतां विप्राः, ब्राह्मण्यै ग्रासाच्छादनं दीयते । काले क्षेत्रे च पात्राय सर्व्वस्वमपि न धर्त्तव्यम् । विप्रेभ्यः पर्शुरामः पृथ्वीमेव प्रादात् । गयायां पित्रे पिण्डं सत्पुत्रः प्रदास्यते । एवमन्या अपि सपल्लवाः संप्रदानोक्तय ऊह्याः । इति संप्रदानोक्तिः ॥ छ ॥

अथ केवलापादानविवक्षायामुदाह्रियते । यथा – 'काहां हु(हुं)त ए पुरुषु आ' – कस्मादयं पुरुष आगतः ?, 'कनउजं' – कान्यकुब्जात् । 'मीत काहां हुंत एतें कालें' – सखे ! कुतस्त्व-मियता कालेन ? । 'ववहरेकरिं कांटीं' – धनिककारायाः, व्यवहरककंटिकातो वा । 'कैसें तौ तो छूटेसि' – कथं तस्या मुक्तोऽसि ?, 'मीतकर लइ देइ' – मित्राद् गृहीत्वा दत्त्वा च । दुर्जनाद् भीतस्य वरं ससर्प्पव्याघ्रं वनम्, न तु ससर्प्पव्याघ्राद् वनाद् भीतस्य सदुर्जनग्राम-वासः । सखे ! कुतोऽधीतवेदोऽसि ?– देवशर्मोपाध्यायात् । ज्ञातरन्धनविधिः कुतः ?– उपाध्यायिन्याः । ग्रासस्ते कुत आसीत् ?–द्विजवर्यगृहेभ्यः । चिरेण दृष्टान् शिष्यानाहूय गुरुः [प० ३०-१] पृच्छति – पुत्राः जानीथ कुतोऽधीतवेदा यूयम् ?, उत्तरम् – युष्मत्तः । पुनः पृच्छति – कुतः तर्ह्यस्माकं सपुत्रदाराणामिदानीं वृद्धावस्थानिवृत्तिः ?, उत्तरम् – अस्मत्तः । एवमन्या अपि लिङ्ग-संख्या-पुरुषभिन्ना अपादानोक्तय ऊह्याः । इत्यपादानोक्तिः ॥ छ ॥

अथाधिकरणविवक्षायामुदाह्रियते । तद्यथा –

भूमौ मर्त्यास्तिले तैलं तरुण्यां रूपसंपदः ।
आधेयं सर्व्वमाधारे निराधारो न विद्यते ॥
कस्मिन् देवगणा ननु(नु ?) नित्यम् ?– स्वर्गे ।
कुत्र सदा गृहिणां स्थितिरिष्टा ?– गृहे ।
भार्ये ! कुत्र रतिस्तव नित्यम् ?– त्वयि ।
भर्त्तः ! कुत्र सदैव मनो मे ?– मयि ।

विद्वन्! भवतः कुत्र निवासः?–वाराणस्यां गङ्गातीरे।
कस्मिन् दानम्, कुत्र विवाहः?–द्विजवरवंशे नागरजातौ॥
सूपकर्त्ता स्थितः पीठे चुल्ल्यां स्थाल्यां महानसे।
ज्वलद्वह्नौ तप्ततोये मध्याह्ने तन्दुलान् पचेत्॥

सप्ताधिकरणमुदाहरणम्। एवमन्या अप्यधिकरणोक्तय ऊह्याः। इत्यधिकरणोक्तिः॥ छ॥

अथ केवलसंबन्धोक्तावुदाह्रियते। यथा–

कस्यैतद् गृहमुन्नतं क्षितिपतेस्तस्यैव राज्ञः पुनः,
सौवर्णाण्डकमण्डितोन्नतशिखं पश्यैतदस्यान्तिके। [प० १०-२]
यस्येयं वसुधा सुधाधवलिता कीर्तिश्च शौर्यार्जिते(ता),
श्रीगोविन्दनृपस्य तस्य सुतरामायुश्चिरं वर्द्धताम्॥ छ॥
स्वर्गः सुराणां पाताललोकश्चैव फणाभृताम्।
श्रीमद्गोविन्दचन्द्रस्य निःशेषं वसुधातलम्॥
धनदस्य धनं भानोः प्रतापो धिषणागुरोः।
गोविन्दनृपतेस्त्वेतत् त्रयमप्यमितं मतम्॥
वद नीरप्रिये कस्य खड्गक्रीडार्जिताः श्रियः।
तव वल्लभ पूर्णेन्दुवदनो यः पित(पति°)र्मम॥ ९॥

एवमन्या अपि लिङ्गादिविशिष्टसंबन्धस्योक्तय ऊह्याः। इति संबन्धोक्तिः॥ छ॥

एवमेकैकविवक्षायां नवैवोक्तयः। अथ व्याप्युक्तिभेदप्रस्तारार्थं वृत्तं सूत्रम्–

आद्यमाद्यमितरेषु निक्षिपेदुक्तिभेदविषये द्वयोर्द्वयोः।
आद्यहीनयुगलेऽथवादिमं निक्षिपेत् त्रिचतुरादिभित्तये॥

अयमर्थः–लिङ्गार्थः, क्रिया, कर्त्ता, कर्म्म, करणम्, संप्रदानम्, अपादानम्, [अधिकरणम्] संबन्धः–इत्यमी नव पदार्थाः। एषां चैकैकस्य संक्षिप्ता उक्तयो यथा–

कोऽयम्?–छात्रः। १॥
किं करोति?–पठति। २॥
कः पठति?–अयमेव। ३॥
किं पठति?–शास्त्रम्। ४॥
केन पठति?–पुस्तकेन। ५॥
कस्मै पठति?–आत्मने। ६॥
कुतः पठति?–उपाध्यायात्। ७॥ [प० ११-१]
क्व स्थितः पठति?–गृहे। ८॥
कस्य?–उपाध्यायस्यैव। ९॥ एवं नव॥ *॥

द्वयोर्द्वयोश्चोक्त्यर्थमाद्यमाद्यमितरेषु द्वितीयादिषु योजयेत् । तद् यथा — प्रथमे लिङ्गार्थे द्वितीयादिषु योजिते या(जा)ता लिङ्गार्थेनाष्टौ भेदाः । यथा —

लिङ्ग-क्रिये । १ ॥
लिङ्ग-कर्त्तारौ । २ ॥
लिङ्ग-कर्मणी । ३ ॥
लिङ्ग-करणे । ४ ॥
लिङ्ग-संप्रदाने । ५ ॥
लिङ्ग-अपादाने । ६ ॥
लिङ्ग-अधिकरणे । ७ ॥
लिङ्ग-संबन्धो(न्धौ) । ८ ॥ एवं लिङ्गार्थेनाष्टौ ॥ * ॥

अथ द्वितीयां क्रियां त्रि(तृ)तीयादिषु निक्षिप्य कृताः सप्त भेदाः । यथा —

क्रिया-कर्त्तारौ । १ ॥
क्रिया-कर्मणी । २ ॥
क्रिया-करणे । ३ ॥
क्रिया-संप्रदाने । ४ ॥
क्रिया-ऽपादाने । ५ ॥
क्रिया-ऽधिकरणे । ६ ॥
क्रिया-संबन्धाविति । ७ ॥
— एवं क्रियया सप्त, आद्यैः सह पञ्चदश ॥ १५ ॥

अथ त्रि(तृ)तीये कर्तरि चतुर्थादिषु योजिते षडुक्तयः । यथा —

कर्तृ-कर्मणी । १ ॥
कर्तृ-करणे । २ ॥
कर्तृ-संप्रदाने । ३ ॥
कर्तृ-अपादाने । ४ ॥
कर्तृ-अधिकरणे । ५ ॥
कर्तृ-संबन्धाविति । ६ ॥
— एवं कर्त्रा षट् । पूर्वैः सहैकविंशतिः ॥ २१ ॥

अथ चतुर्थे कर्मणि पञ्चमादिषु क्षे(क्षि)ते पञ्चोक्तयः । यथा —

कर्म-करणे । १ ॥
कर्म-संप्रदाने । २ ॥
कर्म-अपादाने । ३ ॥

कर्म-अधिकरणे । ४ ॥

कर्म-संबन्धाविति । ५ ॥

—एवं कर्मणा पञ्च, [प० ३१-२] पूर्वैः सह षड्विंशतिः ॥ २६ ॥

अथ पञ्चमे करणे अपादानादिषु योजिते चत्वारो भेदाः । यथा—

5 करण-संप्रदाने । १ ॥

करण-अपादाने । २ ॥

करण-अधिकरणे । ३ ॥

करण-संबन्धाविति । ४ ॥

—एवं करणेन सह चत्वारः, पूर्वैः सह तृं(त्रिं)शत् ॥ ३० ॥

10 अथ षष्ठे संप्रदाने सप्तमादिषु क्षिप्ते त्रयो भेदाः । यथा—

संप्रदान-अपादाने । १ ॥

संप्रदान-अधिकरणे । २ ॥

संप्रदान-संबंधाविति । ३ ॥

—एवं संप्रदानेन सह त्रयः, पूर्वैः सह त्रयस्त्रिंशत् ॥ ३३ ॥

15 अथ सप्तमे अपादानेऽष्टम-नवमयोः क्षिप्ते भेदद्वयम् । यथा—

अपादान-अधिकरणे । १ ॥

अपादान-संबन्धौ । २ ॥

—एवं अपादानेन द्वौ, पूर्वै[:] सह पञ्चतृं(त्रिं)शत् ॥ ३५ ॥

अथाष्टमे अधिकरणे नवमे क्षिप्ते सत्येकः । यथा—

20 अधिकरण-संबन्धाविति । १ ॥

—एवमधिकरणेनैक एव, आद्यैः सह षट्त्रिंशत् । ३६ ॥

एवं द्वयोर्द्वयोर्विवक्षायां षट्त्रिंशदेवोक्तिभेदाः ॥ छ ॥

अथैषां क्रमेणोदाहरणानि, यथा—

'को ए काह कर'—कोऽयं किं कुरुते ?, छात्रोऽयं पठति । १ ।

25 'ए को इहां को पढ'—एष कः, कश्चेह पठति ?, छात्रोऽयमेव ये(ए)व । २ ।

'को ए काह इहां पढ'—क एष किमत्र पठति ?, छात्र[:] शास्त्रम् । ३ ।

'को ए काहें पढ'—कोऽयं केन पठति ?, [प० ३२-१] छात्रः पुस्तकेन । ४ ।

'को ए का किहं पढ'—क एष कस्मै पठति ?, छात्रः स्वस्मै । ५ ।

'को ए का पास पढ'—क एष कुतः पठति ?, छात्र उपाध्यायात् । ६ ।

30 'को ए काहां पढ'—क एष कुत्र पठति ?, छात्रो गृहे । ७ ।

'को ए ककरें घरं पढ' – क एष कस्य गृहे पठति ?, छात्रो गुरोः । ८ ।

– एवं लिङ्गार्थेनाष्टावुक्तयः ॥ छ ॥

अथ क्रियया सप्त यथा –

'काह ईहां कीज केइ' – किमत्र क्रियते केन ?, पठ्यते छात्रेण । ९ ।

'काह करत ईहां काह पढिअ' – किं कुर्वताऽत्र किं पठ्यते ?, गुरुशुश्रूषां शास्त्रम् ।१०।

'काह करत काहें पढिअ' – किं कुर्वता केन पठ्यते ?, गुरुशुश्रूषां पुस्तकेन । ११ ।

'काह करत का किह पढिअ' – किं कुर्वता कस्मै पठ्यते ?, गुरुशुश्रूषां आत्मने । १२ ।

'काह करत का पास पढिअ' – किं कुर्वता कुतः पठ्यते ?, गुरुशुश्रूषामुपाध्यायात् । १३ ।

'काह करत काहा पढिअ' – किं कुर्वता कुत्र पठ्यते ?, गुरुशुश्रूषां गृहे । १४ ।

'काह करत काकरें पढिअ' – किं कुर्वता कस्य गृहे पठ्यते ?, गुरुशुश्रूषां गुरोः । १५ । 10

– एवं क्रियया सप्त ॥ छ ॥

अथ कर्त्रा षट् यथा –

'को ईहां काह पढ' – कोऽत्र किं पठति ?, छात्रः शास्त्रम् । १६ । [पृ० १२-२]

'को काहें पढ' – कः केन पठति ?, छात्रः पुस्तकेन । १७ ।

'को ईहां का किहं पढ' – कोऽत्र कस्मै पठति ?, छात्र आत्मने । १८ । 15

'को ईहां का पास पढ' – कोऽत्र कुतः पठति ?, छात्र उपाध्यात् । १९ ।

'को ईहां काहां पढ' – कोऽत्र कुत्र पठति ?, छात्र आश्रमे । २० ।

'को ईहां ककरें आश्रम पढ' – कोऽत्र कस्याश्रमे पठति ?, छात्रो गुरोः । २१ ।

– एवं कर्त्रा षट् ॥ छ ॥

अथ कर्मणा पञ्चोक्तयो यथा – 20

'काह ईहां पढिअ काहे' – किमत्र पठ्यते केन ?, शास्त्रं पुस्तकेन । २२ ।

'काह पढिअ का किहं' – किं पठ्यते कस्मै ?, शास्त्रमात्मने । २३ ।

'काह पढिअ का पास' – किं पठ्यते कुतः ?, शास्त्रमुपाध्यायात् । २४ ।

'काह पढिअ काहां' – किं पठ्यते कुत्र ?, शास्त्रमास(श्र)मे । २५ ।

'काह पढिअ ककरें' – किं पठ्यते कस्याश्रमे ?, शास्त्रं गुरोः । २६ । 25

– एवं कर्म्मणा पंच ॥ छ ॥

अथ करणेन चतस्र उक्तयो यथा –

'काह ईहां पढिअ का किहं' – केनाऽत्र पठ्यते कस्मै ?, पुस्तकेन स्वस्मै । २७ ।

'काहें पढिअ का पास' – केन पठ्यते कुतः ?, पुस्तकेनोपाध्यायात् । २८ ।

'काहें पढिअ काहां' – केन पठ्यते कुत्र ?, पुस्तकेनाऽऽश्रमे । २९ । 30

'काहें पढिअ ककरें' – केन पठ्यते कस्याश्रमे ?, [पृ० १३-१] पुस्तकेन गुरोः । ३० ।

– एवं करणेन चतस्रः ॥ छ ॥

अथ संप्रदानेन तिस्र उक्तयो यथा—

'का किहं पढिअ का पास'—कस्मै पठ्यते कुतः ?, आत्मन उपाध्यायात् । ३१ ।

'का किहं पढिअ काहां'—कस्मै पठ्यते कुत्र ?, आत्मने गृहे । ३२ ।

'का किहं पढिअ ककरें'—कस्मै पठ्यते कस्य गृहे ?, स्वस्मै गुरोः । ३३ ।

—एवं संप्रदानेन तिस्रः ॥ छ ॥

अथापादानेन द्वे यथा—

'का पास पढिअ काहां'—कुतः पठ्यते कुत्र ?, उपाध्यायाद् वाराणस्याम् । ३४ ।

'कातौ पढिअ ककरें घर'—कुतः पठ्यते गृहे कस्य ?, उपाध्यायाद् गुरोः । ३५ ।

—एवमपादानेन द्वे ॥ छ ॥

अथाधिकरणेनैकैवोक्तिर्यथा—

'काहां पढिअ ककरें घर'—कुत्र पठ्यते कस्य गृहे ?, वाराणस्यामुपाध्यायस्येति । ३६ ।

—एवमधिकरणेनैकैव ॥ छ ॥

एवं द्वयोर्द्वयोर्विवक्षायां षट्त्रिंशदेवोक्तयः । एवमेव त्रयाणां त्रयाणां विवक्षायां चतुरशीतिरुक्तयः । तदुत्पत्तिश्चैवम्—पूर्वोक्तद्विकेषु प्रथमं लिङ्गार्थं विना ये द्विका नवमादयस्तेष्वाद्ये योजिते अष्टाविंशतिस्त्रिभेदा लिङ्गार्थेन भवन्ति । द्वितीयेन च धात्वर्थेन रहितेषु षोडशादिषु द्विकेषु द्वितीये जो(यो)जिते सत्येकविंशति-[प० १३-२] स्त्रिभेदा धात्वर्थेन भवन्ति । पूर्वैः सहैकोनपञ्चाशत् । ४९ । ततस्तृतीयेन कर्त्रा न(र)हितेषु द्वाविंशादिषु द्विकेषु तृतीये क्षिप्ते पञ्चदश त्रिभेदाः कर्त्रा भवन्ति । पूर्वैः सह चतुःषष्टिः । ६४ । ततश्चतुर्थेन कर्मणा रहितेषु सप्तविंशादिषु द्विकेषु चतुर्थे क्षिप्ते दश त्रिभेदाः कर्मणा भवन्ति । पूर्वैः सह चतुःसप्ततिः । ७४ । ततः पञ्चमेन करणेन रहितेषु त्रिंशादिद्विकेषु पञ्चमे क्षिप्ते षट् त्रिभेदाः करणेन भवन्ति । पूर्वैः सहाशीतिः । ८० । ततः षष्ठेन संप्रदानेन रहितेषु चतुस्त्रिंशादिषु षष्ठे क्षिप्ते त्रयस्त्रिभेदाः संप्रदानेन भवन्ति । पूर्वैः सह त्र्यशीतिः । ८३ । ततः सप्तमेनापादानेन रहिते षट्त्रिंशद् द्विके सप्तमे क्षिप्ते अपादानेनैकस्त्रिभेदः । पूर्वैः सह चतुरशीतिः । ८४ । अनेनैव च क्रमेण चतुरादीनामपि पूर्वोक्तसंख्याभेदोत्पत्तिर्ज्ञेया । ग्रन्थविस्तरभयात् नैकैकमुदाहरणमादिमेद्धानां वर्ण्यते । तद् यथा—तत्र त्रिविकल्पार्थे पूर्वपूर्वेण सहानन्तरयोर्विवक्षायां सप्तोक्तयः । यथा—[प० १४-१]

'को ए ईहां, को काह कर'—कोऽयमत्र कस्य किं करोति ?, छात्रोऽयमत्रायम् पठति । १ ।

'काह करत को ईहां काह पढ'—किं कुर्वन् कोऽत्र किं पठति ?, गुरुसेवां छात्रः शास्त्रम् । २ ।

'ईहां को काह काहें पढ'—अत्र कः किं केन पठति ?, छात्रः शास्त्रं पुस्तकेन । ३ ।

'काह काहें का किह छात्र पढ' — किं केन कस्मै छात्रः पठति ?, शास्त्रं पुस्तकेनात्मने । ४ ।
'काहें का किह का पास छात्र ईहां पढ' — केन कस्मै कुतश्छात्रोऽत्र पठति ?,
— पुस्तकेनात्मने गुरोः । ५ ।
'का किह का पास काहां छात्र ईहां पढ' — कस्मै कुतः कुत्र छात्रोऽत्र पठति ?,
— आत्मने उपाध्यायाद् आश्रमे । ६ ।
'का पास काहां काकरें मढ छात्र ईहां पढ' — कुतः कुत्र कस्य मठे छात्रोऽत्र पठति ?,
— उपाध्यायात् केदारस्य मठे । ७ ।
— एवमन्या अपि त्रिविवक्षोक्तयश्चतुरशीतिसंख्याः प्रयोज्याः ॥ छ ॥

अथ चतुर्णां विवक्षायामुक्तयो लिख्यन्ते — तत्र पूर्वेण पूर्वेणानन्तरेषु त्रिषु युक्तेषु षडुक्तयः । यथा —

'को ए काह करत को ईहां काह कर' — कोऽयं किं कुर्वन् कोऽत्र किं पठति ?,
— छात्रोऽयं गुरुसेवामसावत्र शास्त्रम् । १ ।
'काह करत को काह कर काहें' — किं कुर्वन् कः किं पठति केन ?,
— गुरुसेवां छात्रः शास्त्रं पुस्तकेन । २ ।
'को ईहां काह पढ काहें का किह' — कोऽत्र [प० ३४-२] किं पठति केन कस्मै ?,
— छात्रः शास्त्रं पुस्तकेनात्मने । ३ ।
'काह काहें का किह का पास छात्र [ईहां] पढ' — किं केन कस्मै कुतः छात्रोऽत्र पठति ?,
— शास्त्रं पुस्तकेनात्मने उपाध्यायात् । ४ ।
'काहें का किह का पास काहां छात्र [ईहां] पढ' — केन कस्मै कुतः कुत्र छात्रोऽत्र पठति ?,
— पुस्तकेनात्मने गुरुतो मठे । ५ ।
'का किह का पास काहां काकरें छात्र पढ' — कस्मै कुतः कुत्र कस्य मठे छात्रः पठति ?,
— आत्मने पण्डिताद् वाराणस्यां केदारस्य । ६ ।
— एवमन्या अपि चतुर्विवक्षोक्तयः षड्विंशत्यधिकशतसंख्याः प्रयोज्याः ॥ छ ॥

अथ पञ्चानां विवक्षायामुक्तयो लिख्यन्ते । तत्र, पूर्वेण पूर्वेणानन्तरेषु चतुर्षु युक्तेषु पञ्चोक्तयः । यथा —

'को ए काह करत ईहां को काह कर काहें' — कोऽयं किं कुर्वन्नत्र कः किं करोति केन ?,
— छात्रोऽयं गुरुसेवां पठत्यत्र पुस्तकेन । १ ।
'को ईहां काह करत काह पढ काहें का किहं' — कोऽत्र किं कुर्वन् किं पठति केन कस्मै ?,
— छात्रो गुरुसेवां शास्त्रं पुस्तकेनात्मने । २ ।

'को ईहां काह पढ काहें का किंह का प(पा)स' – कोऽत्र किं पठति केन कस्मै कुतः ?,
– छात्रः शास्त्रं पुस्तकेनात्मने पण्डितात् । ३ ।

'छात्रु ईहां काह पढ काहें का किंह का [प० ३५-१] पास कांहां' – छात्रोऽत्र किं पठति केन कस्मै कुतः कुत्र ?, शास्त्रं पुस्तकेनात्मने पण्डिताद् वाराणस्याम् । ४ ।

5 'काहें का किह का पास काहां काकरें घर छात्र [ईहां] पढ' – केन कस्मै कुतः कुत्र कस्य गृहे छात्रोऽत्र पठति ?, पुस्तकेनात्मने पण्डितात् कन्यकुब्जे गुरोः । ५ ।

– एवमादयो अन्या अपि पञ्चविवक्षोक्तयः षड्विंशशतसंख्याः प्रयोज्याः ॥

अथ षण्णां विवक्षायामुक्तयो लिख्यन्ते । तत्र, पूर्व्वेण पूर्व्वेण परेषु पञ्चसु युक्तेषु चतस्र उक्तयः । यथा –

10 'को ए काह करत को ईहां काह पढ कांहें का किंह ?' – कोऽयं किं कुर्व्वन् कोऽत्र पठति केन कस्मै ?, छात्रोऽयं गुरुसेवामयमत्र शास्त्रं पुस्तकेनात्मने । १ ।

'को ईहां काह करत काह पढ काहें का किंह का पास' – कोऽत्र किं कुर्व्वन् किं पठति केन कस्मै कुतः ?, छात्रो गुरुसेवां शास्त्रं पुस्तकेनात्मने पण्डितात् । २ ।

'को ईहां काह पढ काहें कां किंह का पास काहां' – कोऽत्र किं पठति केन कस्मै कुतः
15 कुत्र ?, छात्रः शास्त्रं पुस्तकेनात्मने पण्डितात् प्रयागे । ३ ।

'छात्र ईहां काह पढ काहें का किह का पास काहां ककरें घर' – छात्रोऽत्र किं पठति केन कस्मै कुतः कुत्र कस्य गृहे ?, शास्त्रं पुस्तकेनात्मने पण्डितात् प्रयागे [प० ३५-२] द्विजस्य । ४ ।

– एवमादयो अन्या अपि षड्विवक्षोक्तयश्चतुरशीतिसंख्याः प्रयोज्याः ॥ छ ॥

20 अथ सप्तानां विवक्षायामुक्तयो लिख्यन्ते । तत्र, पूर्वेण पूर्वेणानन्तरेषु षट्सु युक्तेषु तिस्र उक्तयः । यथा –

'को ए काह करत को ईहां काह पढ कांहें कां किंह का पास' – कोऽयं किं कुर्वन् कोऽत्र किं पठति केन कस्मै कुतः ?, छात्रोऽयं गुरुसेवामसौ शास्त्रं पुस्तकेनात्मने पण्डितात् । १ ।

'काह करत को ईहां काह पढ केईं का किंह का पास कांहां' – किं कुर्वन् कोऽत्र किं
25 पठति केन कस्मै कुतः कुत्र ?, गुरुसेवां छात्रः शास्त्रं पुस्तकेनात्मने पण्डितादाश्रमे । २ ।

'को ईहां काह पढ काहें कां किंह का पास काहां ककरें' – कोऽत्र किं पठति केन कस्मै कुतः कुत्र कस्य ?, छात्रः शास्त्रं पुस्तकेनात्मने पण्डितादाश्रमे ब्राह्मणस्य । ३ ।

– एवमादयो अन्या अपि सप्तविवक्षोक्तयः षट्त्रिंशत्संख्याः प्रयोज्याः ॥ छ ॥

अथाष्टानां विवक्षायामुक्तयो लिख्यन्ते । तत्र, पूर्वेण परेषु सप्तसु युक्तेषु द्वे उक्ती यथा—

'को ए काह करत को ईहां काह पढ काहें का किह का पासु काहां'—कोऽयं किं [प० ३६-१] कुर्वन् कोऽत्र किं पठति केन कस्मै कुतः कुत्र ?, छात्रोऽयं गुरुसेवां अयमत्र शास्त्रं पुस्तकेनात्मने पण्डितादालये । १ ।

'काह करत को ईहां काह पढ [काहें] का किंह का पास काहां ककरें'—किं कुर्वन् कोऽत्र किं पठति केन कस्मै कुतः कुत्र कस्य ?, गुरुसेवां छात्रः शास्त्रं पुस्तकेनात्मने पण्डितादालये द्विजस्य । २ ।

—एवमादयो अन्या अपि अष्टविवक्षोक्तयो नवसंख्याः प्रयोज्याः ॥ छ ॥

नवानां विवक्षायामेकैवोक्तिः । यथा—

'को ए काह करत को काह पढ काहें का किहं का पास काहां ककरें'—क एष किं कुर्वन् कः किं पठति केन कस्मै कुतः कुत्र कस्य ?, छात्रोऽयं गुरुशुश्रूषामसौ शास्त्रं पुस्तकेनात्मने पण्डितादाश्रमे ब्राह्मणानाम् । १ ।

एवमत्रोक्तीनामेकादित एकाशीतिर्दर्शिता । अनेनैव च क्रमेण पञ्चशतान्येकादशोत्तराणि प्रयोज्य बालानां दर्शयितव्यानि ।

आमन्त्रणपदविवक्षायां चैता उक्तयस्तत्सहिताः प्रयोज्याः । यथा—

'अहो को तुं'—भोः कस्त्वम् ?, देवदत्तोऽहमित्यादि ॥ छ ॥

अथ दशानामप्यर्थानामुक्ति-प्रत्युक्ती भुजङ्गप्रयाताभ्यां यथा—

सखे ब्रूहि कस्त्वं चिरं किं च कुर्वन्
लिखेत् कः किमत्रेदृशं केन कस्मै । [प० ३६-२]
कुतः कुत्र कस्येति लोकोक्तिरेषा
यदेकत्र वाच्ये दशानां विवक्षा ॥
अहं विप्रपुत्रः पठन्नेव शास्त्रं
लिखामि स्वयं पाणिनैवात्मने स्वात् ।
गुरोः प्राप्य तिष्ठन् गृहेऽस्यैव रम्ये
प्रयोगप्रकाशं य(ज)गत्स्वार्थहेतुम् ॥

इदमुक्तिव्यक्तिशास्त्रं प्रयोगप्रकाशापरनामधेयमित्यर्थः । सविशेषणेषु च विवक्षितेषु तत्सहिताः प्रयोज्याः । यथा—

'को ए मुंडें मुंडे दीर्घा चूलीं धोती परिहें'—कोऽयं मुण्डितमुण्डो दीर्घचूडः परिहित-धौतवस्त्रः ?, विद्यार्थी ।

'कैसें काह करत, को कस इहां, कैसें काह पढ, कैसें काहे, कैसें का किह, कैसे हि काहितौ, कैसें ककरें, कैसें काहां' – कथं किं कुर्व्वन्, कः कीदृशोऽत्र, कथं किं पठति, कीदृशेन केन, कीदृशाय कस्मै, कीदृशात् कस्मात्, कीदृशे कस्मिन्, कीदृशस्य कस्य ।

सारदं कुरु (सादरं गुरु?-)सेवामसौ विद्यार्थी स्वाचारः सुस्पष्टासुक्तिव्यक्ति शुद्धेन पुस्तकेनान्वयार्थिने स्वस्मै शिष्यहिताद् गुरोर्निरुपद्रवे गृहे अस्यैवोपकारशीलस्येति ॥ छ ॥

एते च लिङ्गार्थादयो विवक्षाक्रमेण छन्दोनुरोधेन च यथेष्टमपि प्रयोज्याः, नतूक्तक्रमेणैव ।

एतस्मादर्थदशकाच्च बाह्य एकादशोऽर्थो वेदेषु [प० ३७-१] शास्त्रेषु लोकेषु वा क्वापि नास्त्येव प्रायः, तस्य प्रयोगा दर्शनात् । एतानि च दशपदानि मूलानि कृत्वा, य एषां पल्लवाः – कालभेदजा आख्यातिककार्त्त-प्रत्ययार्थ-विशेषभावाद् लिङ्ग-संख्या-पुरुषभेदकृता उक्तानुक्तत्वनिबन्धना विशेषण विशेष्यभावभाविनस्ते च नियतसंख्या अप्यनियतसंख्या एव । लोकोक्तिभङ्गीनामपरिसंख्येयत्वात् । किन्तु मूलमाश्रित्य विवक्षा भवति । तच्च दशविधमेव । तदनुगताश्च पल्लवा विवक्षिता अविवक्षिता वा यथेष्टं प्रवर्तन्त एव । अत एकादशोत्तराणि पञ्चशतान्येवोक्तीनामित्युक्तम् । एवं स्थिते त्रि(तृ?)तस्यादि-स्यादयो दर्शितलिङ्गानुशासनाश्च बाला यथाप्रश्नमेक-द्व्यादि विवक्षाक्रमेणोक्तिं शिक्षयितव्याः । ततो ज्ञातनिःशेषोक्तिभेदाः संस्कृतं जानन्त्येव परम् । तथा च सति यदि विशेषसंस्कारार्थं शब्दशास्त्रं सा(श्रा)व्यन्ते तदा को दोषः । किं च तदा तत् तेषां सुखग्राह्यं भवति । गुरुरपि चानायासेनैव बोधयत्यचिरेण च । इतरथा तु स्यादित्याद्योर्लिङ्गानुशासनानां च निर्माणमभ्यसनं च निरर्थकमेव । अकृत-तदाभ्यासानामपि शब्दशास्त्रस्य जा(या)वज्जीवाभ्यासेन [प० ३७-२] तदर्थावगमदर्शनात् । न च कृततदभ्यासानां ज्ञातशब्दशास्त्राणामभ्यस्ततर्कमीमांसार्थशास्त्रसा(सा)हित्यानामपि लेखपत्रादिषु लोकव्यवहारोपयुक्तेषु [अ]नभ्यस्तोक्तिप्रकाराणां प्रावीण्यं कदाचनापि भवति । दृश्यन्ते हि सर्वज्ञा अपि छान्दसवदितरजनवद् वा तदर्थं तदभिव्यक्तमभ्यर्थयन्तः, इतरजनेषु पठितमूर्ष-(र्ख)व्यपदेशभाजश्च । उक्तिप्रकाराभिज्ञास्त्वज्ञातेतरशास्त्रा अपि लोकव्यवहारं प्रवर्त्य(र्त)-यन्तो राजगृहादिषूपादेया दृश्यन्त एव । अतः शास्त्रस्य प्रथमं दृष्टफलं लोकव्यवहार एव । अत एवैतच्छास्त्रं कृतम् । तस्माद् उक्तिव्यक्तिं बालाः शिक्षयितव्या एव ॥ छ ॥

॥ इत्युक्तिव्यक्तिविवृतावुक्तिभेदव्याख्या ॥

अथ 'अकर्मक-सकर्मका एवम्' [का० ९] इत्युक्तम्, अतो बालशिक्षार्थं तदनुगता लोकोक्तयो अपरा अपि कियन्त्यो लिख्यन्ते । तत्राकर्मकधात्वर्थानु[ग]तास्तावद् यथा –

'गांग न्हाएं धर्मु हो, पापु जा' – गङ्गायां स्नाते धर्मो भवति, पापं याति ।

अथवा – 'धर्मु भा, पापु गा' – धर्मो बभूव, पापं जगाम ।

अथवा – 'धर्मु होइह, पापु जाइह' – धर्मो भविष्यति, [प० २८-१] पापं यास्यति । 5

– एवमन्येऽपि पक्षशः पूर्वोक्ताः प्रतिप्रयोगं योज्याः बालशिक्षार्थम् । ग्रन्थविस्तरभयाच्च न दर्शिताः ॥ छ ॥

'जस जस धर्मु वाढ, तस तस पापु घाट' – यादृग् यादृग् धर्मो वर्धते, तादृग् तादृग् पापं घट्टति, घट्टयति वा । घट्ट चलने भ्वादौ, चुरादौ च ।

'जब जब धर्मु वाढ, तब तब पापु ओहट' – यदा यदा धर्मो वर्धते, तदा तदा पापं 10 अवघटति, अवघटयति वा । घट संघाते चुरादौ ।

'जैसें जैसें धर्मु जाम, तैसें तैसें पापु खा(खा)म' – यथा यथा धर्मो जायते, तथा तथा [पा]पं क्षीयते । जनी प्रादुर्भावे; क्षि क्षये, क्षयति वा ।

